जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्
राजस्थानराज्यसंस्कृतशैक्षिकानुसंधान एवं प्रशिक्षणसंस्थानम्, जयपुरम्
राजस्थानसंस्कृतअकादमी, जयपुरम्

त्रिदिवसीयम् अन्ताराष्ट्रियसंस्कृतसम्मेलनम्

International Sanskrit Conference

दिनांक : 3,4,5 मार्च 2020

संस्कृतज्ञानविज्ञानस्य वैश्विकचिन्तनम्

Global Thinking of Sanskrit knowledge and Science

शोधपत्रसारसंग्रहः
Summaries of Research Papers

प्रकाशकः

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुलगीत

श्रीजगद्गुरु रामानन्दाचार्यसंस्मृतिदायकोऽयम्।
जयति राजस्थानसंस्कृतविश्वविद्यानायकोऽयम्।।

सत्फलं माघाशिषां राणाप्रतापचरित्रचित्रम्
मन्दिरं मधुसूदनस्य सरस्वती-पुष्करपवित्रम्
भूत-वर्तित-भाविविद्या-साधनारतिदर्पकोऽयम्
जयति राजस्थानसंस्कृतविश्वविद्यानायकोऽयम्।।

स्वामिरामानन्दमधुरस्वप्नसम्पूर्तौ निमग्नः
शान्तशान्तः ग्रामपरिवेषे स्थितः स्वाध्यायलग्नः
भात्यहो हिमहारधवलः शारदाप्रावारकोऽयम्
जयति राजस्थानसंस्कृतविश्वविद्यानायकोऽयम्।।

मरुवणेषु विराजते सम्मान्यरामानन्दपीठे
स नारायणदास आचार्यो मतश्चात्मप्रतिष्ठे
तस्य संकल्पाशिषां साकारविग्रहधारकोऽयम्
जयति राजस्थानसंस्कृतविश्वविद्यानायकोऽयम्।।

प्रत्ननूतनशास्त्ररक्षी साम्प्रतिकशिक्षाभिमानी
संगणकशिक्षः कलादक्षश्च विद्याविनयदानी
सन्ततं सर्वोदये संस्कारसंस्कृतिधारकोऽयम्
जयति राजस्थानसंस्कृतविश्वविद्यानायकोऽयम्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



सतत आशीःप्रदाता



श्रीरामानन्द सम्प्रदाय की अनुपम महाविभूति,
खोजी पीठाचार्य-ब्रह्मपीठाधीश्वर पूज्यपाद

स्वामी श्रीनारायणदासजी महाराज

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्
राजस्थानराज्यसंस्कृतशैक्षिकानुसंधान एवं प्रशिक्षणसंस्थानम्, जयपुरम्
राजस्थानसंस्कृतअकादमी, जयपुरम्

त्रिदिवसीयम् अन्ताराष्ट्रियसंस्कृतसम्मेलनम्

International Sanskrit Conference

दिनांक : 3,4,5 मार्च 2020

संस्कृतज्ञानविज्ञानस्य वैश्विकचिन्तनम्
Global Thinking of Sanskrit knowledge and Science

शोधपत्रसारसंग्रहः

Summaries of Research Papers

संरक्षकः

प्रो.अनुला मौर्य

प्रधानसम्पादकः

डॉ. सुभाषचन्द्रशर्मा

सम्पादकाः

डॉ. राजधरमिश्रः

डॉ. के.साम्बशिवमूर्तिः

डॉ. नारायणहोसमने

सहसम्पादकाः

डॉ. कैलाशचन्द्रशर्मा

डॉ. उमेशनेपालः

डॉ.कुलदीपसिंहः

प्रबन्धसमितिः

श्री सुरेशकुमारबुनकरः

श्री संजयझाला

श्रीमती मनीषीलालस

डॉ. विनोदकुमारशर्मा

डॉ. माताप्रसादशर्मा

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



कलराज मिश्र
राज्यपाल, राजस्थान

संदेश

मुझे यह जानकर प्रसन्नता हुई है कि जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय, राजस्थान संस्कृत शैक्षिक अनुसंधान एवं प्रशिक्षण संस्थान तथा राजस्थान संस्कृत अकादमी के संयुक्त तत्त्वावधान में दिनांक 03 से 05 मार्च, 2020 को त्रिदिवसीय अन्तर्राष्ट्रीय संस्कृत सम्मेलन का आयोजन किया जा रहा है। संस्कृत विश्वविद्यालय द्वारा प्राचीन संस्कृत शास्त्रों में निहित ज्ञान-विज्ञान को प्रकाश में लाने के लिए इस प्रकार का आयोजन किया जाना सराहनीय प्रयास है।

इस अवसर पर विद्वानों से प्राप्त शोध पत्रों का प्रकाशन जनसामान्य के लिए उपयोगी सिद्ध होगा।

मैं इस अवसर पर आयोजन की सफलता की शुभकामना करता हूँ।

(कलराज मिश्र)

राज भवन, सिविल लाइन्स, जयपुर-302006
Raj Bhawan, , Civil Lines, Jaipur-302006
दूरभाष : 0141-2228716-19, 2228611-12, 2228722

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सत्यमेव जयते

मुख्यमंत्री
राजस्थान

अशोक गहलोत

मुम./सन्देश/ओएसडीएफ/2020
जयपुर, 29 फरवरी, 2020

संदेश

मुझे यह जानकर प्रसन्नता है कि जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय, मदाऊ, जयपुर में संस्कृत भाषा का अंतर्राष्ट्रीय स्तर पर प्रचार-प्रसार और प्राचीन संस्कृत शास्त्रों में निहित ज्ञान-विज्ञान को प्रकाशमान करने की दृष्टि से 3 से 5 मार्च, 2020 तक ''अंतर्राष्ट्रीय संस्कृत सम्मेलन'' का आयोजन और विद्वज्जन से प्राप्त शोध पत्रों का प्रकाशन किया जा रहा है।

देववाणी संस्कृत भाषा के ग्रंथों में अध्यात्म, दर्शन के साथ-साथ ज्ञान-विज्ञान के अनेक विषयों की महत्त्वपूर्ण सामग्री उपलब्ध है।

आशा है इस अंतर्राष्ट्रीय सम्मेलन के निष्कर्ष और विद्वानों के शोध पत्रों की सामग्री संस्कृत भाषा में विद्यमान ज्ञान-विज्ञान को व्यापक बनाने में सहायक होगी।

मैं इस सम्मेलन में शामिल देश-विदेश के संस्कृत विद्वानों का स्वागत करते हुए इस सम्मेलन के आयोजन और शोध पत्रिका के प्रकाशन की सफलता के लिए अपनी शुभकामनाएं देता हूँ।

(अशोक गहलोत)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



डॉ. सुभाष गर्ग

राज्य मंत्री

राजस्थान सरकार

तकनीकी शिक्षा एवं संस्कृत शिक्षा (स्वतंत्र प्रभार),
चिकित्सा एवं स्वास्थ्य, आयुर्वेद और चिकित्सा,
चिकित्सा एवं स्वास्थ्य सेवाएं (ई.एस.आई.)
एवं सूचना एवं जनसम्पर्क विभाग

संदेश

एतद् अवगम्य अहम् अत्यन्तम् आनन्दम् अनुभवामि यद् जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालयः, राजस्थानसंस्कृतशैक्षिक-अनुसंधान एवं प्रशिक्षणसंस्थानम्, राजस्थान-संस्कृत अकादमी, जयपुरम् इत्येतेषां संयुक्ततत्त्वावधाने 03.03.2020 तः 05.03.2020 दिनांकपर्यन्तं त्रिदिवसीयम् अन्तर्राष्ट्रियसंस्कृतसम्मेलनम् आयोज्यते। संस्कृतस्य तत्सम्बद्धज्ञानविज्ञानस्य च प्रसाराय आयोज्यमाने अस्मिन् सम्मेलने विद्वद्भिः प्राप्तानां शोधपत्राणां प्रकाशनमपि भवति इति महद् गौरवास्पदम्।

इदं सम्मेलनं प्रकाश्यमाना चेयं पत्रिका सर्वेभ्यः मंगलाय भवेत् इति स्वकीयां शुभकामनां प्रेषयामि।

(डॉ. सुभाष गर्ग)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



Professor Dinesh Singh
Ex-Vice Chancellor

कुलाधिपति
के.आर. मंगलम विश्वविद्यालय
गुड़गांव

संदेश

मुझे यह जानकर प्रसन्नता हुई है कि जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय द्वारा **''संस्कृतज्ञानविज्ञानस्य वैश्विकचिन्तनम्''** विषय पर एक त्रिदिवसीय अन्तर्राष्ट्रीय संस्कृत सम्मेलन का आयोजन किया जा रहा है। वर्तमान परिप्रेक्ष्य में यह विषय और अधिक महत्वपूर्ण एवं प्रासंगिक हो जाता है, क्योंकि विश्व को मानव-जीवन के प्रत्येक क्षेत्र में आये दिन नयी-नयी चुनौतियों का सामना करना पड़ रहा है, जिसके लिये हर पल एक नयी समस्या के लिये नया समाधान खोजने की आवश्यकता है। भारतवर्ष के मनीषियों ने हजारों वर्ष पूर्व ही मानव-जीवन को ज्ञान-विज्ञान के माध्यम से सरल, सहज एवं प्रभावशाली बनाने की दिशा में अपने विचारों एवं ग्रन्थों के माध्यम से मानव-समाज को सदैव उपकृत किया है। निस्सन्देह संस्कृत वाङ्मय ज्ञान-विज्ञान का एक अद्भुत स्रोत है, जिसे जनकल्याण की दिशा में सतत समन्वेषण की आवश्यकता है।

मैं इस सम्मेलन के सफल आयोजन तथा आयोजकों के लिये अपनी हार्दिक शुभकामनाएं सम्प्रेषित करता हूँ।

दिनेश सिंह

(प्रो. दिनेश सिंह)
कुलाधिपति
के.आर. मंगलम विश्वविद्यालय
गुड़गांव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुलपति, जगद्गुरु रामानन्दाचार्य
राजस्थान संस्कृत विश्वविद्यालय
जयपुर

प्रो. अनुला मौर्य

शुभाशंसा

ज्ञान-विज्ञान से समन्वित विवेकपूर्वक किया गया कार्य प्रामाणिक एवं सर्वोपयोगी होता है। भारतीय संस्कृतिक परम्परा में वेदादि संस्कृत वाङ्मय ही ज्ञान की प्राचीन निधि है यह सर्वविदित तथ्य है। वर्तमान ज्ञानार्जन की प्रवृत्तियों में प्रामाणिकता के साथ उसमें प्रखरता लाने हेतु शोध, सतत अनुसंधान ही एक सर्वोत्तम साधन है। भारत में इस शोध एवं अनुसंधान की प्राचीन परम्परा रही है, जिसका परिणाम हमें जैमिनि के धर्मसूत्र, बादरायण के ब्रह्मसूत्र एवं पाणिनि के अष्टाध्यायी आदि के ग्रन्थों से प्राप्त होता है। शोध की परम्परा को विकसित करने, नये मानक एवं युगानुरूप गुणवत्ता में सुधार लाने हेतु शिक्षण संस्थाओं द्वारा अन्तर्राष्ट्रिय स्तर पर विद्वत् सम्मेलनों का आयोजन किया जाता रहा है। संस्कृत को विश्वस्तर पर संरक्षित, प्रतिष्ठित तथा सुरक्षित रखने में राजस्थान अग्रणी प्रदेश है।

अत्यन्त हर्ष की बात है कि माननीय श्री अशोक गहलोत, मुख्यमंत्री, राजस्थान सरकार द्वारा संस्थापित जगदुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय परिसर में दिनांक 03-05 मार्च, 2020 को राजस्थान संस्कृत अकादमी तथा राजस्थान संस्कृत शैक्षिक अनुसंधान एवं प्रशिक्षण संस्थान, महापुरा, जयपुर के संयुक्त तत्त्वावधान में त्रिदिवसीय अन्तर्राष्ट्रिय संस्कृत सम्मेलन का आयोजन हो रहा है साथ ही विद्वानों द्वारा विभिन्न विषयों में प्राप्त शोधसार का प्रकाशन भी किया जा रहा है।

मैं आशा करती हूँ कि संस्कृत विश्वविद्यालय द्वारा आयोजित यह सम्मेलन, संस्कृत को नये रूप में विश्वस्तर पर प्रतिष्ठापित करने में प्रेरक बनेगा। इस अवसर पर माननीय कुलाधिपति श्री कलराज मिश्र जी का आशीर्वाद एवं माननीय मुख्यमंत्री श्री अशोक गहलोत जी का दिशानिर्देश हमारे लिये प्रेरणास्पद है। इस त्रिदिवसीय अन्तर्राष्ट्रिय संस्कृत सम्मेलन के आयोजन के मुख्य प्रेरक एवं निर्देशक, विश्वविद्यालय में शैक्षणिक स्वरूप को उन्नत करने, शोध के क्षेत्र में विश्वस्तरीय कार्य के द्वारा संस्कृत को प्रसारित करने के लिये सतत चिन्तक माननीय संस्कृत शिक्षा मंत्री डा. सुभाष गर्ग जी का मैं हार्दिक धन्यवाद करती हूँ। वित्तीय सहयोग प्रदान कर आयोजन को भव्य बनाने में अमूल्य योगदान करने के लिये माननीय साहित्य कला संस्कृत मंत्री डॉ. बी.डी. कल्ला जी के प्रति भी मैं धन्यवाद ज्ञापित करती हूँ। इस अवसर पर मैं राजस्थान संस्कृत अकादमी, जयपुर के निदेशक श्री संजय झाला जी एवं समस्त सहयोगी अधिकारी, शिक्षक एवं कर्मचारी तथा विश्वविद्यालय परिवार के सभी सदस्यों के प्रति तथा विशेषरूप से इस सम्मेलन में भाग लेने वाले विद्वानों, विशिष्ट अतिथियों एवं प्रतिभागी शोधपत्र वाचकों के प्रति अपनी हार्दिक शुभकामना एवं धन्यवाद ज्ञापित करती हूँ तथा इस सम्मेलन के आयोजन की सफलता के लिये अपनी शुभकामनाएं ज्ञापित करती हूँ।

(प्रो. अनुलामौर्यः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

डॉ. सुभाष चन्द्र शर्मा

सह–आचार्य साहित्य विभाग
जगद्गुरु रामानन्दाचार्य
राजस्थान संस्कृत विश्वविद्यालय
जयपुर

सम्पादकीय

जगद्गुरुरामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय में आयोजित हो रहे अन्तर्राष्ट्रीय संस्कृत सम्मेलन में भाग ग्रहण करने के इच्छुक विद्वज्जनों द्वारा ''संस्कृतज्ञानविज्ञानस्य वैश्विकचिन्तनम्'' विषय के अन्तर्गत अपनी रुचि एवं अध्ययन अनुरूप लिखित शोध सारों का इस स्मारिका द्वारा प्रकाशन हुआ है। इसमें संस्कृत, हिन्दी एवं अंग्रेजी तीनों भाषाओं में प्राप्त शोधसारों का संकलन है। देश विदेश के अन्तर्राष्ट्रीय स्तर पर ख्याति प्राप्त विद्वानों एवं शोधच्छात्रों द्वारा प्राप्त लेखों में वेद, ज्योतिष, व्याकरण, साहित्य, मानवीयमूल्य, योग, वेदान्त, धर्मशास्त्र, पुराण, शिक्षा, न्याय आदि पारम्परिक विषयों के साथ सामाजिक विज्ञान, सूचना सम्प्रेषण तकनीकी, भूगर्भ जल विज्ञान, इत्यादि आधुनिक विषयों पर भी प्रकाश डाला गया है।

शोधसार प्रकाशनार्थ प्रेरणा एवं उचित मार्गदर्शन हेतु इस विश्वविद्यालय की माननीया कुलपति महोदया के प्रति हार्दिक आभार व्यक्त करता हूँ। अल्प समय में इस स्मारिका को इस रूप में लाने के लिए डॉ. राजधर मिश्र, डॉ. के. साम्बशिवमूर्ति, डॉ. नारायण होसमने, डॉ. कैलाश चन्द्र शर्मा, डॉ. उमेश नेपाल एवं डॉ. कुलदीप सिंह को अनेक साधुवाद।

सुभाष शर्मा

(डॉ. सुभाष चन्द्र शर्मा)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथर्ववेदोपवर्णित वास्तुतत्त्वविमर्शः

डॉ.जगदीश नारायण विजय
सहायक कुलसचिव

अथर्ववेदे वास्तुविद्याविषयकी पर्याप्तचर्चा दृश्यते । केवलं अथर्ववेदे न अपितु वैदिकयुगे वास्तुशास्त्रस्य महत्त्वपूर्णं स्थानमासीत् । अतः यजुर्वेदे कथितमस्ति–

नमः वास्तव्याय च वास्तुपाय।

अनेनेदं ज्ञायते यत् तस्मिन् युगे वास्तुविद्यायाः व्यापकत्वमासीत् । ग्रामदेवतारूपेण भगवतः शिवस्य स्थानमद्यापि वर्तते। गृहदेवतारूपेण वास्तुदेवतायाः पूजा–अर्चना–जप–हवनादिकर्म अद्यापि गृहे सुखशान्तिधनधान्यमभिवृद्ध्यर्थं क्रियते। वेदे वर्णितः गृहदेवता एव वास्तुदेवतारूपेण प्रसिद्धिं प्राप्तवान्निति वक्तुं शक्यते। गृहदेवता एव वास्तोष्पतिः इत्यस्य चर्चा वेदे वर्णितं दृश्यते। वास्तुदेवता मनुष्याणां कल्याणं करोति। द्विपदानां चतुष्पदानां च रोगं हरति, तेषां कल्याणं करोति, गोवादिधने समृद्धिं करोति। वास्तुदेवता गृहस्थानां सुरक्षां करोति। अस्य वास्तुपुरुषस्य स्थानं ग्रामे नगरे गृहे वाप्यां दुर्गे पुरे च सर्वत्र विद्यते । असौ भूमौ च व्याप्य सर्वेषां मनुष्यपशुपक्षिणां कल्याणं करोति। यः पूजां करोति स सर्वदा सुखमाप्नोति।

वास्तुचक्रस्य निर्मणात्प्राक् भूपरीक्षा आवश्यकी भवति। अस्यां परीक्षायां भूकर्षणम्, अंकुरारोपणम् एवं समीकरणं वैदिकीव्यवस्थायाः एकं महत्त्वपूर्णं विकासक्रमः अस्ति। यथा–

यथेयं पृथिवी मही भूतानां गर्भमादधे।

एवा दधामि ते गर्भं तस्मै त्वामवसे हुवे॥

वस्तुतः वास्तुपुरुषः अथवा वास्तोष्पतिः प्राचीन वैदिकीदेवतायाः एकं स्वरूपम्। प्रजापतिरूद्रः एव वास्तुपुरुषस्य जन्मदाता। वास्तोष्पतिः अथवा गृहपतिः तस्यापरं नाम।

यः मनुष्यः अस्य गृहदेवतायाः वास्तुपुरुषस्य पूजनं अर्चनञ्च न करोति स अश्रियं मृत्युमाप्नोति । पदे पदे विघ्नानां तस्य गृहे प्रवेशो जायते। ये नराः वास्तुपूजां नाचरन्ति ते ब्राह्मणः शापवशात् तस्य वास्तुपुरुषनामराक्षसस्य आहारो भविष्यन्ति। एवं ज्ञात्वा मानवैः गृहारम्भे प्रवेशसमये अवश्यमेव वास्तुपूजनं करणीयम्। द्वारस्य निर्माणे यज्ञादिषु अनुष्ठाने पुत्रजन्मनि व्रतबन्धे विवाहे महोत्सवे जीर्णोद्धारप्रसंगे शिलान्यासे वज्राग्निदूषिते गृहे वास्तुशान्तिः प्रत्येकमानवैः अवश्यमेव करणीयम्। ये यस्मिन् समये वास्तुशान्तिं न करिष्यन्ति तेषां गृहे अकल्याणकारकानां प्रसंगानां वृद्धिः भविष्यति। गृहस्योन्नतिः परिवारस्य वृद्धिः स्थगिताः भविष्यन्ति। वेदेषु वास्तुपुरुषोऽयं यत्र विभिन्नानां रोगाणां नाशं करोति। अयं सोमसदृशः वर्णितः कुत्राप्ययं त्वष्ट्रा सह साम्यं भजते। यत्र कुत्रापि इन्द्रेण सह साम्यं भजते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनुस्मृत्यां नारीसंरक्षणम्

मोहन लाल शर्मा
शोधच्छात्र
जरारासंविवि जयपुर

मानवाधिकारस्य धारणायां नारीणां संस्थितिरपि चर्च्यते। ताः समानतया व्यवहरेयुः। ताः अपि गृहे समाजेऽपि समानतया समभागिन्यः स्युः। तासां सुखसौविध्यं प्रति अवधानं देयम्। एतादृशी व्यवस्था मनुस्मृतावपि प्राप्यते। मनु महोदयाः कथयन्ति यत् इष्टिकाप्रस्तरादिभिः निर्मितानाम् भित्तीनां समूहं गृहं न भवति। गृहस्य संरक्षिकास्तु नार्यः एव सन्ति।

न गृहं गृहमित्याहु गृहिणी गृहमुच्यते।

गृहे नारीणां सम्मानं देवं मत्वा एव भेवत्। यत्र नारीणां सम्मानो भवति तत्रैव देवाः निवसन्ति यत्र ताः अवमन्यन्ते तत्र सर्वाः क्रियाः निष्फलाः भवन्ति।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।

मनुमहाशयाः विधावानां पुत्रहीनानाम् आतुरीणां सम्पत्तिरमधिकर्तृन् अपि सचेतयति यदि ते एवं करिष्यन्ति तर्हि ते दण्डनीयाः भविष्यन्ति।

वशाऽपुत्रासु चौवं स्याद्रक्षणं निष्कुलासु च।

पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च।।

जीवन्तीनां तु तासां ते तद्धरेषुः सबान्धवाः।

तान् शिष्याच्चौरदण्डेन धार्मिकः पृथ्वीपतिः।।

नृपतिः वन्ध्याः अपुत्राः परित्यक्ताः (निष्कुलाः) पतिव्रताः विधवाः आतुराः संरक्षेत् । यदि कोऽपि राज्ञः बान्धवः उत वा तासां बान्धवः जीवन्तीनाम् तादृशीनां धनं हरेत् चेत् राजा तं चौरदण्डेन दण्डयेत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतमाध्यमेन संस्कृतशिक्षणम्

डॉ अभिनव उपाध्याय
जयपुर
9887115748

पुरा संस्कृतभाषा समाजे लोकभाषा राजभाषा व्यवहारभाषा आसीदिति प्रमाणानि उपलभ्यन्ते। अपितु तत्काले शिक्षायाः माध्यमपि संस्कुतमासीत्। सहस्रवर्षेभ्यः संस्कृतमाध्यमेन प्रचलन्ती भारतीयशिक्षापरम्परा आंग्लानां शासनकाले विच्छिन्ना जाता । संस्कृतशिक्षोपरि कुठाराघातः 1835 तमे वर्षे " मैकालेघोषणापत्रस्य संस्तुतिभिः जातः। अनेन आंग्लमाध्यमविद्यालयानां विस्तारः जातः। सम्प्रति भारते दृश्यते यत् संस्कृतमाध्यमशिक्षाव्यवस्था तु परिवर्तनीया वर्तते। वस्तुतः शिक्षाव्यवस्थाया संस्कृतपठनायापि बहुत्रः अवकाशः न लभ्यते। अनेन समाजे संस्कृतस्य व्यवहारः अत्यल्पः जातः। एवं गच्छति काले समाजे विद्यामानाऽपि संस्कृतव्यवहारः लुप्तो भवेदिति चिन्तायाः विषयः। लोके संस्कृतं विहाय अन्याः सर्वाः भाषाः तद्भाषामाध्यमेनैव पाठ्यन्ते। अनुवादविधिना पाठनं आधिक्येन भवति। संस्कृतशिक्षणे प्रत्यक्षपद्धत्याः आश्रयणपुरस्सरं संस्कृतमाध्यमेनैव पाठनीयम्। संस्कृत छात्राः संस्कृते सम्भाषणशीलाः भवेयुः। तदर्थं प्रयासाः विधेयाः। समुचितशिक्षणोपकरणनामभावः, अनाकर्षकपद्धतीनां शिक्षणे प्रयोगः , शिक्षणे क्लेशानुत्पादयन्ति। भाषाध्यापनं तया भाषया एव भवेत्। तदानीमेवभाषायाः सौष्ठवस्य संरक्षणं भवितुमर्हति अनुवादमाध्यमेन भाषाशिक्षणेन शिक्षणकौशलानां विकासः कथमपि कर्तुं न शक्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याकरणे शाब्दविज्ञानम्

कृष्णदेवशुक्लः
शोधच्छात्रः, व्याकरणविभागस्य,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य, जयपुरम्

शाब्दविज्ञानविषये व्याकरणशास्त्रे अतिसूक्ष्मतया चिन्तनं कृतं वर्तते। व्याकरणस्य सिद्धान्तः शाब्दविषये अस्ति यत् व्यापारमुख्यविशेष्यकः एव शाब्दबोधः। शाब्दबोधाय सर्वतः प्राक् शक्तिग्रहः अपेक्षितः अस्ति एवञ्च प्रायः सर्वमान्यं परिभाषणम् अस्ति यत् यत्प्रकारकयत्विशेष्यकः शक्तिग्रहः तत्प्रकारकतत्विशेष्यपकोपस्थितिः, यत्प्रकारकयत्विविशेष्यकोपस्थितिः तत्प्रकारकतत्विशेष्यकः शाब्दबोधः। वैयाकरणेन ''देवदत्तः पचति'' इत्यस्य शाब्दबोधः इत्थं दर्शयति ''देवदत्ताभिन्नैककर्तृकः ओदनकर्मकः, वर्तमानकालिकः विक्लित्त्यनुकूलो व्यापारः'' अत्र आख्यातार्थकर्त्तरि देवदत्तः अभेदसम्बन्धेन तथा च तिप्रत्ययवाच्यसंख्यैकत्वञ्च समवायसम्बन्धेन विशेषणमस्ति। तिप्रत्ययार्थः यः वर्त्तमानकालः सः स्वरूपसम्बन्धेन एवञ्च विक्लित्तिः जनकत्वसम्बन्धेन व्यापारे विशेषणमस्ति अतः आयाति निष्कर्षः यदत्र प्रधानो व्यापारः तथा च कर्त्ता, कालः विक्लित्तिफलञ्च एतत्त्रयं व्यापारे विशेषणमस्ति। वैयाकरणसम्प्रदाये विचाराणां द्विधा प्रवृत्तिः वरीवर्ति। विचारानेव उद्दिश्य प्राचीनवैयाकरणमतम्, नव्यवैयाकरणमतम् इति व्यवहारः बोभोति। तत्र प्राचीनवैयाकरणः फलविशिष्टव्यापारं स्वीचकार – धातोः फलविशिष्टव्यापारे एका शक्तिः तथा च कर्तृवाच्ये कर्मवाच्ये च शाब्दबोधे व्यापारस्यैव प्राधान्यम्। नव्यवैयाकरणमते धातोः फलव्यापारयोः पृथक्–पृथक् खण्डशः शक्तिः स्वीकृता अस्ति एवञ्च कर्तृवाच्ये शाब्दबोधे व्यापारस्य प्राधान्यम्। कर्मवाच्ये शाब्दबोधे फलस्य प्राधान्यं भवति। कर्मवाच्यस्य ''देवदत्तेन ओदनः पच्यते'' इति वाक्यस्य ''देवदत्तवृत्तिवर्तमानकालिकव्यापारजन्या ओदननिष्ठा विक्लित्तिः'' इत्थं शाब्दबोधः। कर्तृवाच्यस्य ''देवदत्तः ओदनं पचति'' इति वाक्यस्य ''देवदत्ताभिन्नैककर्तृकः ओदनकर्मकः वर्तमानकालिकः विक्लित्त्यनुकूलो व्यापारः'' इत्थं शाब्दबोधः। एवमेव प्रकारेण शाब्दबोधस्य कार्यकारणभावः यथा ''तद्धर्मावच्छिन्नशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नवृत्तिविशिष्टज्ञानं हेतुरित्यादि विचाराः विस्तरेण सम्पूर्णे शोधपत्रे प्रतोष्यत इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुराणशास्त्रोक्त प्रलयकालतत्त्वानि

अजय कुमार शर्मा
शोधच्छात्र
ज्योतिष–विभाग
जरारासंविवि, जयपुर

येन क्रमेण भौतिकपदार्थानामुत्त्पत्तिः भवति, तद्वैपरीत्येन च क्रमेण तस्य संहारोऽपि भवति। अर्थाद् यो पदार्थः सृष्टिकाले येन पदार्थेन सृष्टो भवति, सः तस्मिन्नेव पदार्थे संहारकाले लीनोऽपि भवति, इति सिद्धान्तः। वेदान्ते उत्पत्ते अर्थः व्यक्तिः किञ्च संहारस्यार्थः लयः। न कश्चिदपि पदार्थः असत् सन् उत्पद्यते, एवं न सद्रूपेण कस्यापि पदार्थस्य नाशः भवति। किन्तु कारणमेव कार्यःपेण प्रतिभासते। कारणसत्तातिरिक्ता कार्यस्य न कापि सत्ता, कारणसत्ता एव कार्यस्य वास्तविकसत्ता भवति।

सत्प्रकारेण प्रलयकालविषये प्रमुखेषु पुराणेषु वर्णनं प्रदत्तः वर्तते। तत्र मत्स्यपुराणे पञ्चषष्ठ्योत्तरेकसप्तमेध्याये, कूर्मपुराणे द्वितीयेऽध्याये, विष्णुपुराणे, श्रीनरसिंहपुराणे, श्रीवामनपुराणे च इत्यादिषु विशेषतः बाहुल्येन सन्ति विषयाः प्रलयकालस्य वर्णिताः।

नित्यप्रलयः–

प्रतिदिनं जायमानः नित्यप्रलयः। सः सुषुप्तिः, यत्र सकलकार्याणां प्रलयः जायते। एकमपि कार्यं व्यक्तःपेण न भवति। अतः सकलकार्यस्य प्रलयःपेण जायमानत्वात् सुषुप्तिरेव नित्यप्रलयः। सा सदा अस्माकं प्रलयं करोति, अर्थात् सुषुप्तिकाले यदा यदा कार्यं स्वकारणे लीयते, तत्समये तमोगुणावृत्तः मनुष्यः सुखःपं प्राप्नोति। सः सुषुप्तिःपप्रलयः नित्यं प्रचलति, अत एव नित्यप्रलयः कथ्यते।

नैमित्तिकप्रलयः–

ब्रह्मण एकस्य दिनस्य समाप्ते सति जायमानविश्वनाशः नैमित्तिकप्रलयः कथ्यते। अर्थात् कार्यब्रह्मणः (हिरण्यगर्भ) दिनस्य समाप्ते जाते तन्निमित्तकलोकत्रयं, भूर्लोकः, भुवर्लोक, स्वर्लोकः एते नश्यन्ति। चतुर्युगानां सहस्रकालः ब्रह्मणः दिनं भवति।

नैमित्तिकप्रलयोऽयं तावत् भवति यावद्धिरण्यगर्भस्य दिनं भवति। हिरण्यगर्भस्य दिनं यावत् भवति तावदेव तस्य रात्रिरपि भवति। अतः नैमित्तिकप्रलयः सः कथ्यते यदा विश्वस्रष्टा भगवान् हिरण्यगर्भः सम्पूर्णत्रिलोकं स्वस्मिन् लयं कारयन् शेषय्यायां स्वपिति। उक्तञ्च मत्यस्यपुराणे –

विद्याद् द्वादशसाहस्रीं युगाख्यां पूर्वनिर्मिताम्।
एवं सहस्रपर्यन्तं तदहो ब्राह्ममुच्यते।।
ततोऽनि गते तस्मिन् सर्वेषामेव जीविनाम्।
शरीरनिर्वृतिं दृष्ट्वा लोकसंहार–बुद्धितः।।
देवतानाञ्च सर्वासां ब्रह्मादीनां महीपते।
दैत्यानां दानवानाञ्च यक्षराक्षसपक्षिणाम्।।
गन्धर्वाणामप्सरसां भुजङ्गानाञ्च पार्थिव।
पर्वतानां नदीनाञ्च पशूनाञ्चौव सत्तम।।
तिर्यग्योनि–गतानाञ्च सत्वानां कृमिणान्तथा।
महाभूतपतिः पञ्च ह्त्वा भूतानि भूतकृत्।।
जगत्संहरणार्थाय कुरुते वैशसं महत्।

प्राकृतप्रलयः

यदा प्रत्येकं वस्तु प्रकृतौ विलीयते तदा सः प्राकृतः प्रलयः कथ्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्यान्ते सर्वसत्त्वानां सहेतौ प्रकृतौ लयः।
तेनायं प्रोच्यते सद्भिः प्राकृतः प्रतिसञ्चरः।
ब्रह्मानारायणेशानां त्रयणां प्रकृतौ लयः।

अर्थात् कार्यब्रह्मणः नष्टे तन्निमित्तकसमग्रकार्याणां नाशः भवति। अत्र नाशशब्दः लयार्थवाचकः न तु प्रध्वंसवाचकः। सुषुप्तिकाले कार्यब्रह्मविनाशनिमित्तकसकलकार्याणां नाशः न भवति। अतः अतिव्याप्तिदोषः न भवति। कार्यब्रह्मणोऽर्थः हिरण्यगर्भः प्रथमजीवः, आदिकर्ता तथा ब्रह्मापि स एव।

स वै शरीरी प्रथमः स वै पुरुष उच्यते।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तते।।

हिरण्यगर्भस्य यदा परब्रह्मणः साक्षात्कारः जायते, तदा ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्मसमाप्ते सति विदेहकैवल्यनामिका परमा मुक्तिः प्राप्यते। अपि च हिरण्यगर्भलोके वर्तमानजीवा अपि परं ब्रह्म साक्षात्कारानन्तरं विदेहमुक्तिं लभन्ते। अर्थात् प्राकृतप्रलयप्राप्ते सति यदा हरिण्यगर्भस्य मुक्तिः भवति, तदा सत्यलोकनिवासिनोऽपि ब्रह्मसाक्षात्कारेण विदेहमुक्ताः भवन्ति।

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्।

प्राकृतप्रलयं व्यञ्जन् कथयितुं शक्यते यत् निमेषारम्भस्य सत्त्वात् प्राकृतप्रलयान्तर्गतप्रकृतेः, कार्यम् उत्पत्तिः , लयश्च तस्याधारः।

निमेषादिकालोत्पत्तिः ब्रह्मण एव। प्रलयसमयनिमेषादयोऽपि तस्मिन्नेव ब्रह्मणि लीयन्ते। तात्पर्यमिदमस्ति यत् समग्रकार्याणां प्रकृतौ मायायां लयो, जायते। कार्यब्रह्महिरण्यगर्भस्य च परब्रह्मणिलयो जायते। एवं तेनैव सह तल्लोकवासिनां सर्वेषां तस्मिन् परब्रह्मणि लयो भवति। अयमेव प्राकृतप्रलयः महाप्रलयोऽपि कथ्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारायणभट्टतिरिमहोदयस्य व्यक्तित्त्व–कृतित्त्वविमर्शः

अमित मीणा
शोधच्छात्र
साहित्य–विभाग
जरारासंविवि, जयपुर

संस्कृतसाहित्ये विषयवैपुल्यदृष्ट्या यथा तथैव विषयगाम्भीर्यदृष्ट्या विषयविश्लेषणमहिम्ता च तत्त्वानि विदुषां विविदिषुणां च कृते शेवधिः एव भवतीति मन्यते। पुराणेषु दर्शनेषु वेदेषु तन्त्रा विषयां ज्योतिषे च नूतनशोधानां कृते महान् अवकाशः वर्तते। तथैव काव्यसाहित्यमपि संस्कृते विरचितं नानादृष्ट्वा शोधार्थीनां कृते महानतमवसरं प्रददाति। यथा मध्ययुगवर्तिनि साहित्यलेखने भारतीयसमाजोपरि आपतितानामान्तरसमस्यानां बाह्याक्रमणानां च प्रतिक्रियाः, प्रदेशवेशभाषाजातिकर्माचारादिभिः त्रुटि तस्य समाजस्य संयोजनसमर्थं सूत्रं प्रति अन्वेषणशीलता इत्यदयः बहवो विषयः तत्कालिकसाहित्ये द्रष्टुं शक्यन्ते। कवीनां प्रवृत्तिरेव भूयसि समाजस्य चिन्तनं प्रतिबिम्बयति।

मध्ययुगे भक्तिप्रधाने साहित्ये कविभिः पराक्रान्तम् ऐतिह्यविदां नागोचरम्। पराभवे, शोषणे, अत्याचारे, लुण्ठने सत्येपि तद्विरोधिप्रतिक्रियापेक्षया तत्सहनपूर्वकं स्वात्मशक्तिसमृद्धिवृद्धिविधायिनि साहित्यसर्जने एव तात्कालिकानां कविनां प्रवृत्तिः लक्ष्यते। जनेषु तादृश शक्तिसंचारञ्च ईश्वरभक्तिरिव नान्योपायः कर्तुमलमिति विगते समये भारतीयनैतिह्यं जानतामपरोक्षमेव। प्रान्त्यभाषासु रचितेन भक्तिसाहित्येन यथा समाजे विलक्षणः प्रभावः भवति, संस्कृतभाषायां तदा रचितैः भक्तिसाहित्यैः तथैव प्रभावः कृत इति यद्यपि वक्तुं न शक्यते तथापि संस्कृतकाव्यानां समाजे अन्यादृश एव प्रभावः जातः इति वक्तुं शक्यते।

अस्मिन् एव भक्तिसाहित्यमण्डले केरलेषु नीलनदीतीरे पेरुमलंग्रामवास्तव्येन नारायणभट्टतिरिनामकेन विदुषां प्रणीतं श्रीनारायणीयं नाम काव्यमन्यतम। षोडश्यां शताब्द्यां विरचितमिदं काव्यं भक्तिप्रधानम्। श्रीमद्भागद् महापुराणमुपजीव्य श्रीभागवतोक्तविषयान् तेनैव क्रमेण समुपस्थापयति इदं काव्यम्। समग्रतामाहत्य अस्मिन् काव्ये षट्त्रिंशद्युत्तरसहस्रं पद्यानि सन्ति। दशकेषु विभक्तेऽस्मिन् काव्ये नानाविधानि छन्दांसि प्रायोजिषत। बहुत्र वातव्याधिहरणाय कृतानि प्रार्थनानि च अस्य काव्यस्य शिवेतरक्षतये इत्युक्तप्रकारं कायाधिशमनमेव प्रयोजनमिति प्रतिपादयन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋग्वेदे सृष्टिविमर्शः

अक्षय दाधीच
शोधच्छात्र
ज.रा.रा.सं.वि.वि

आधुनिक समये ब्रह्माण्डस्योत्पत्तेः विषये बहुविधाः प्रकल्पनाः कृताः । अद्यापि ब्रह्माण्डस्योत्पत्तेः विषये वैज्ञानिकैः बहुविधाः सिद्धान्ताः प्रतिपादिताः । तेषु जैव भौतिक सिद्धान्तः बिगबैगं थ्योरी च प्रसिद्धा वर्तते ।

अस्माकं शास्त्रेष्वपि ब्रहमाण्डस्योत्पत्ते विषये वर्णनं वर्तते । शास्त्रेषु प्राचीनतमः ग्रनथः ऋग्वेदः इति सयुंक्तराष्ट्रसंघेन उद्घोषितम् । ऋग्वेदे ब्रह्माण्डस्योत्पत्तेः विषये नासदीय सूक्ते चर्चा विहिता ।

नासदीय सूक्तम् ऋग्वेदस्य दशममण्डलस्य एकोनत्रिंशदधिकं शततमं सूक्तं वर्तते । अस्मिन् सूक्ते ब्रह्माण्डस्योत्पत्तेः विषये क्रमिकं वर्णनं क्रियते ।

यथा–

नासदासीन्नो सदासीत्तदानीं नासीदनो नोव्योमा परोयेत् ।
किमावरीवः कुहकस्य शर्मन्नंभः किमसीद्र गहनंगभीरम् ।।

अर्थात्–

सृष्टेः उत्पत्तेः प्राक् प्रलयदशानां अभामात्मकं तत्वं भावात्मकं तत्वं च न आसीत् । स्वर्लोकं मृत्युलोकं पाताललोकञ्च नासीत् । अन्तरीक्षमपि नासीत् । ततः परं न किमपि नासीत्, किमपि आवृत्तं नासीत्, अर्थात् तस्मिन् काले किमपि गतनं गभीरं नासीत् । कस्यापि सत्तात्मिका स्थितिः नासीत् । तस्मिन् समये मृत्योः स्थितिः नासीत् मृत्येः अभावः अपि नासीत् । दिवरात्री अपि न आस्ताम् । तस्मिन् समये केवलं सर्व विवृतैः अवच्छिन्नं ब्रह्मतत्वमेव क्रियाशून्यत्व रूपेण आसीत् उक्तञ्च–

तम आसीन्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाम्भविहितं यदासीत्तपसस्तन्महिना जायतैकं ।।

अर्थात्– जगदीदं तमोव–त्तेन आच्छादीतं आसीत् यत् जगतः मूलकारणरूपेण विद्यमानमासीत् । सम्पूर्णस्य जगतः सलिलात्मिका स्थितिः आसीत् । अद्यापि जलं जीवनस्य पर्यायत्वेन गृह्यते । वैज्ञानिकाः जीवनस्य अन्वेषणाय प्रथमं जलमेव आविष्क्रियन्ते अनेयेषु गृहेषु । एभिः बहुभिः मन्त्रैः मूलतत्वानां वर्णनं अत्र कृतमस्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"पतंजली व्याकरणमहाभाष्ये प्रथम आह्निके शब्दस्वरूपम्"

शोधच्छात्रः
अशोक कुमार पंचोली
जरारासंविवि जयपुरम्,

अत्र शब्दस्वरूपं प्रतिपादयन्। लोके प्रचलित ध्वनिनां पतंजलिशब्दरूपेण स्वीकरोति। लोके शब्दानां शब्देन ध्वनिऽर्थे जानाति। पतंजलि अन्यत्र महाभाष्ये ध्वनिनां शब्दस्य गुणेऽपि कथ्यते। एव तर्हि स्फोटशब्दः ध्वनिशब्दगुणः। "ब्राह्मणेन निष्कारणो धर्मः षड्ंगोः वेदोऽध्येयो ज्ञेयश्च" कथित्वा पतंजलि महोदयेन तस्य नित्य अध्ययनस्य वार्ता करोति। शब्दज्ञानेन विना अध्यापनं न भविष्यति। अत एव ब्राह्मणानां शब्दज्ञानं अवश्यमेव करणीयम्। पतंजलिमहोदयेन शब्दस्य निम्नऽर्थ प्रतिपादयन्। पतंजलिनां प्रोक्ताः –

दुष्टः शब्द स्वरतो वर्णतो वा,
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति,
यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

दुष्टान् शब्दान्मा प्रयुक्षमहीत्यध्येयं व्याकरणम्। दुष्टः शब्दः। दुष्ट शब्द इति स्वरेण स्वरतः। महाभाष्ये शब्दस्य अतिमहत्त्वपूर्णऽर्थे अपि प्रयुज्यते। यथा –

यद्यपि बहुनाधीसे पटपुत्र तथापि व्याकरणम्।
स्वजनः श्वजनो मा भूत्सकलः शकलः सकृच्छकृत्।।

शब्दः एकस्मिनऽर्थे प्रयुक्तः साधुः भवति। अन्यत्रऽर्थे शब्दः अपि असाधुः भवति।

'''

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टाध्याय्यां प्रसङ्गः

Anil Kumar Sanmuk
University of Hyderabad

पाणिन्युपज्ञं व्याकरण तद् ग्रन्थमधिकृत्य कृत सन्दर्भः "अष्टाध्याय्यां प्रसङ्गः" प्रसङ्गार्थम् अभिधेयार्थम् इयं लघुसञ्चिका आरभ्यते, पाणिनिना सूत्रैः यत्र आचरितः प्रसङ्गमभिधीय सन्दर्भः, तत्प्रसङ्गमभिधीय कार्याणि तु आचार्यः निष्कुर्वते, परन्तु स प्रसङ्गशब्द आचार्यस्तु न व्यभिचरति, तदपि कार्याणि तत्र समाभवन्ति इति। विना शब्देन अर्थस्तु न प्रचलति, "अर्थेन विना शब्दः शब्देन विना अर्थः इति" शब्दान्तरं प्रयुज्य आचार्यः तत्प्रसङ्गमभिधीय कार्याणि निष्कुर्वते इत्याशयः। तस्य शब्दस्य अर्थो प्रपञ्चितः व्याख्याकारैः अनुचारिभिः वैय्याकरणैः सुमुखसरस्वतीभिः विप्रपण्डित– मण्डितभूषण "जिनेन्द्रबुद्धिना" इति। तस्य जिनेन्द्रबुद्धिनः वचनमादाय अष्टाध्याय्यां यत्र यत्र आचार्येण प्रसङ्गमभिधीय कार्याणि आचरितः, तत्र तत्र तदुद्देश्यमुद्धृत्य प्रसङ्गिता इयं प्रलेखिका इति। आचार्यस्य मूलवचनमधिकृत्य जिनेन्द्रबुद्धिना कृतार्थं सन्धाय अष्टाध्याय्यां सूत्रैः विकीर्णान् प्रसङ्गान् उद्धृत्य साभिमतशास्त्रेण सानुकूलससन्दर्भोचित शब्दैः प्रपञ्चितोऽयं शोधलेखः इति।

शोधलेखस्य प्रयोजनम् प्रसङ्गस्सन्दर्भमधिकृत्य सूत्रार्थप्रयोजने च विबाध्येते इति, सूत्रस्थ पदं न केवलं रूढं न च योगरुढं यादृच्छिकञ्चेति, सूत्रस्थ पदान्यपि लोकायुक्त स्थानानि समागृह्य सशास्त्रेण व्यवहारेण च सम्मिल्य स्वामर्थं प्रकिरति इति। व्यवहाराधीनं शास्त्रम्, न शास्त्राधीनं व्यवहारमिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतसाहित्ये राष्ट्रप्रेमभावना

डॉ0 छगन लाल शर्मा
सहायकाचार्यः, संस्कृतविभाग
आर0बी0एस0 कॉलेज, आगरा

संस्कृतसाहित्यस्य आरम्भः वेदैः जातः इत्यत्र नास्ति कस्यापि कापि विप्रतिपत्तिः। एतेषु वेदेषु अस्मदृषिभिः मानवजीवन–सम्बन्धितानामनेकेषां विषयाणां पर्याप्तमीमांसा प्रस्तुतीकृता वर्तते। तेषां दृष्टिः न केवलं मानवस्य सामाजिक – आर्थिक– धार्मिक– सांस्कृतिकपक्षाणामेव मूल्यांकनं विदधाति अपितु स्वदेशभक्तिसम्बन्धिभावान् अपि प्रकटयति। यतो हि ऋषयः अस्मदीयाः सम्यग्विजानान्ति स्म यत् सामूहिकसम्मानपूर्णस्थित्यर्थम् एतत् परमम् आवश्यकं यत् स्वभूमेः स्वराष्ट्रस्य च रक्षा मनसा वचसा कर्मणा चैव कार्येति। एतत्तदैव सम्भवति यदा वयं स्वजन्मभूमेः, स्वराष्ट्रस्य कृते निष्ठावन्तो भवेम। तदुन्नत्यै सर्वदा क्रियाशीलाः भवेम। स्वराष्ट्रास्तित्वरक्षार्थं सर्वदा संगठिताः जागकरूका च भवेम इति। अन्यथा अन्न–जल–धन–धान्यसमृद्धस्य अस्य राष्ट्रस्य उपरि अन्यदेशवासिनः आक्रमणं करिश्यन्ति। फलस्वरूपं स्वदेशीयाः एव जनाः अभावग्रस्ताः भविष्यन्ति। एतत्सर्वं विचार्यैव भारतीयैः ऋशिभिः अत्रस्थ–सामान्यजनमनसि राश्ट्रियभावनां पूरयितुं वेदेशु अनेकेषु स्थलेषु स्वमातृभूमेः मुक्तकण्ठेन प्रशंसा कृता वर्तते। यत्पठित्वा श्रुत्वा वा अस्माकं समेशां मनसि अस्मद्देशं प्रति गौरवभावो प्रेमभाव च वर्धते।

स्वजन्मभूमिं मातृत्वेनांगीकरणस्य भावना प्रप्रथमतया वेदेभ्यः एव समुपलब्धा वर्तते। उक्तं च ऋग्वेदे–

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः।

तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना श्रृणुतं धिष्ण्या युवम् ।। (1/89/4)

स्वजन्मभूमेः कृते 'मातृभूमिः' इति पदस्य सम्बोधनकरणस्य शिक्षा वेदेभ्यः एव लभ्यते। तत्र च प्रमाणम् ऋग्वेदस्य अयं मन्त्रः–

"द्यौमे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवीमहीयम्" (ऋग्वेदः, 1/164/33)

ऋग्वेदस्य अन्ये अपि मन्त्राः प्रमाणम्–

'द्यौर्व :पिता पृथिवी माता सोमो भ्राता अदितिः स्वसा' इति (ऋग्वेदः, 1/191/6)

एवमेव–

मा नो माता पृथिवी दुर्मतौ धात् । (ऋग्वेदः, 5/42/16)

वैदिकर्षीणां दृष्टौ मातृभूमिरेव तेषां सर्वस्वम् आसीत्। ते इमामेव स्वर्गत्वेन गणयन्ति स्म। तेषां मते इयं कल्याणकारिणी माता विपुलशक्तिदायिनी, नित्या, विशाला, सुखदा, योगक्षेकारिणी, भोजनदायिनी च अस्ति। ते इत्थं गायन्ति अस्याः यशोगीतम् –

"अदितिद्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः

विश्वे देवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वम्। इति (अथर्ववेदः 7/6/1–4)

वेदेषु न केवलम् आकाशपृथिव्योः एव मातृपितृत्वेन स्तुतिः कृता वर्तते अपितु नगराणां प्रति स्वाभिमानभावना प्रकटीकृता वर्तते। तदयथा–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'यस्याः पुरो देवकृतः' (अथर्ववेदः, 12/1/44)

अर्थात् तेषां वैदिकर्षीणामियं भावना आसीद्यत् ये ये नगरविशेषाः वर्तन्ते तेषां सर्वेषां स्थापना अस्मद्देवैः कृता अस्ति । एतत्कथनेन वैदकर्षीणां मनसि नगराणां प्रति दिव्यता, पवित्रता, तीर्थभूमिभाव च इत्येतत्सर्वं साक्षात्कर्तुं भाक्यते।

न केवलमेतदेव अपितु नदीनां प्रति समादरभावना, पर्वतानां प्रति प्रेमभावना इत्येतत्सर्वं राष्ट्रप्रेमभावनामेव उद्बोधयति ।

<u>पुराणेषु राष्ट्रप्रेमभावनाः</u>

पुराणानि अस्मद्भारतीयसंस्कृतिसभ्यताया च कोशागाराणि सन्ति। अत्रापि राष्ट्रप्रेमभावना बहुधा मुखरिता दृश्यते। पुराणेषु भारतमातुः बहु यशोगानं कृतं वर्तते। इयं भारतभूमिः तादृशी महीयसी गरीयसी च यत्र देवाः अपि समागत्य वासं कर्तुम् इच्छान्ति। देवगणाः सर्वे अपि अस्याः भारतभूमेः गुणगानादिकं कुर्वन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनोवैज्ञानिकानां मते सामाजिकव्यवहारः

दीपक तिवारी
शोधच्छात्र
शिक्षा–विभाग
राष्ट्रीय संस्कृत संस्थान, भोपाल परिसर

समाजमनोवैज्ञानिकः सामाजिकपरिस्थितिषु व्यक्तेः व्यवहारस्य अध्ययनं करोति। अयं व्यवहारः सामाजिकव्यवहारः कथ्यन्ते। सामजमनोविज्ञानं सामाजिकव्यवहारस्य स्वरूपकारणञ्च अध्ययनाय बलं ददाति। एवञ्च जनस्य सामाजिकव्यवहारस्य विश्लेषणमपि पृथक् पृथक् स्थानानुसारं करोति। एतस्य तात्पर्यं सामाजिकव्यवहारस्य समग्रतया ज्ञानमस्ति।

सामाजिकव्यवहारस्य स्तराणि–

1 वैयक्तिकस्तरः– वैयक्तिकस्तरेषु व्यक्तित्वशीलगुणम् अभिप्रेरणामनोवृत्तिञ्च आगच्छन्ति।

व्यक्तित्वशीलगुणम्– जनानां शीलगुणसिद्धान्तानुसारेण व्यक्तित्वस्य संरचना पृथक् पृथक् रूपस्य अनेकशीलगुणानां मिलित्वा निर्माति। शीलगुणस्य तात्पर्यं व्यक्तेः व्यवहारस्य वर्णनम्।

अभिप्रेरणा– आधुनिकमनोवैज्ञानिकानुसारं जनानां विभिन्नव्यवहाराणां संचालितानिर्देशितसंघटितश्च कारयति। सा प्रमुखशक्तिरूपेण अभिप्रेरणायाः ज्ञानं महत्त्वपूर्णं भवति।

अभिवृत्ति– अभिवृत्तिजनस्य व्यक्तित्त्वस्य महत्त्वपूर्णं पक्षो वर्तते। यथार्थे अभिवृत्तिः एका सामाजिक पत्ययः अस्ति। यो इतरेतर परिस्थितिषु जनेन क्रियमाणानां व्यवहारस्य प्रवृत्तिं पश्यति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्राह्मणग्रन्थानां लोकोपयोगिता

डॉ.देवेन्द्र कुमार
सहायकाचार्य
जरारासंविवि, जयपुर

भारतीयमान्यतानुसारेण वेदाः सृष्टेः प्रपञ्चस्यास्य प्राथमिकी वाणी वर्तते। सर्गस्य सर्गक्रमस्य वेद एव कारणम्। **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इति प्रतिज्ञापरिशिष्टवचनात् ब्राह्मणभागः वेदोऽस्ति ब्राह्मणशब्दः संस्कृतसाहित्ये द्विविधः एको जातिवाचकः एपरः ग्रन्थवाचकः। जातिवाचको ब्राह्मणशब्दः पुल्लिङ्गे प्रयुज्यते तत्रैव ग्रन्थवाचको ब्राह्मणशब्दः नपुंसकलिङ्गे प्रयुक्तो भवति।

ब्राह्मणं ब्रह्मणः व्याख्यापरकग्रन्थानां नाम अस्ति। ब्राह्मणग्रन्थेषु सर्वाधिकमहत्वशाली विपुलकायस्तथा यीगीनुष्ठानस्य स्रवोत्तमप्रतिपादको ग्रन्थः इदमेव शतपथब्राह्मणमस्ति। यजुर्वेदस्योभयोः काण्वमाध्यन्दिनशाखयोः शतपथब्राह्मणमुपलब्धमस्ति। शतपथब्राह्मणस्य महत्ताऽनया घटनया एव प्रस्फुटा भवति यदयं ग्रन्थः प्रायः समग्रयज्ञयागानां सांगोपांगं विवरणं प्रस्तौति, तच्चान्यब्राह्मणेषु दुर्लभमस्ति। यज्ञस्यारम्भः वैदिकयुगस्यारम्भकालादेवास्ति । पूर्वं तु यज्ञस्य विधानं संक्षेपतः एवाभवत् किञ्च कालान्तरे याज्ञिकसंस्थेयमतिविस्तृताऽभवत्। ब्राह्मणयुगः याज्ञिकसंस्थायाः पूर्णविकासस्य युगोऽस्ति। अस्य परिचयो विभिन्नब्राह्मणग्रन्थेषु प्राप्यते। स्वकीयवर्ण्यविषयाणां गम्भीरविचारहेतुना सम्पूर्णब्राह्मणसाहित्यस्य शतपथब्राह्मणमिदं मुकुटमणि मन्यते।

आधुनिककाले जनाः यज्ञकर्मणो विमुखाः दृश्यन्ते, अज्ञानवशाच्च यज्ञेन न कोऽपि लाभः इति मुहुर्मुहुः जल्पन्ति। वस्तुतः यज्ञस्य आध्यात्मिकदृष्ट्या लाभस्तु सर्वजनविदित एव यथा–**यज्ञो वै श्रेष्ठतमं कर्म, यज्ञो वै विष्णुः, विष्णुर्वै यज्ञः, स्वर्गकामो यजेत्, अग्निष्टोमेन यजेत स्वर्गकामः** इत्यादिवचांसि यज्ञस्य आध्यात्मिकं महत्वं प्रतिपादयन्ति। निष्कामकर्मणः सर्वप्रथममुदाहरणं वर्तते यज्ञः। परमात्मनः प्राप्तेः कृते समर्पणभावनां **तेन त्यक्तेनभुञ्जीथाः** सूचयत्ययं यज्ञः। ईश्वरविरचितमिदं जगत्, तस्य स्मृतिं कारयत्ययं यज्ञः। इत्थम् आध्यात्मिकदृष्ट्या बहवो लाभाः सन्ति यज्ञस्य।

वैज्ञानिकदृष्ट्याऽपि यज्ञस्य लाभ इतोऽप्यधिको वर्तते। यस्मिञ्जगति वयंजीवामः तत् परितः स्थितमावरणं पर्यावरणं कथ्यते। पर्यावरणाय यज्ञस्य सर्वाधिका उपयोगिता भवति। वायुमण्डल ऑक्सीजेन तथा कार्बन डाइऑक्सइड इति वाय्वोः सन्तुलनं यज्ञमाध्यमेन संस्थाप्यते इति बहुविधपरीक्षणैः वैज्ञानिकाः साधितवन्तः। एताः प्राकृतिकाः विसङ्गतीः दूरीकर्तुमस्माकं प्राचीनर्षयः पृथ्वीअन्तरिक्षद्युलोकस्थितं पर्यावरणं सन्तुलयितुं प्राकृतिकशक्तीनां गहनमध्ययनं कृत्वा देवतारूपेण ताः स्वीकृतवन्तः। एताः देवरूपशक्तीः यथावत् स्वानुकूला निर्मातुम् ऋषयः नानाकर्मभिः तासाम् आराधनां कृतवन्तः। तेष्वेव कर्मसु यज्ञोऽपि श्रेष्ठतमकर्मरूपेण मन्यते। पर्यावरणशुद्धेः अभिन्नङ्गत्वेन ऋषयः मानवस्य दिनचर्यायांयज्ञकर्मणः अनिवार्यत्वं प्रतिपादितवन्तः।

अयं यज्ञः वेदे भुवनस्य नाभिरूपेण कथितः अयं यज्ञो भुवनस्य नाभिः। ब्रह्माण्डस्य केन्द्रबिन्दुः उद्गमस्थलं यज्ञो वर्तते । शतपथब्राह्मणानुसारम् ऋतशब्दः यज्ञस्यपर्यायो वर्तते। अस्मिन्नेव ऋते सम्पूर्णञ्जगद् नियन्त्रितं भवति। गीतायां ब्रह्मरूपेण चेद् ब्राह्मणग्रन्थे सार्वभौमसत्तारूपेण अयं यज्ञः स्वीक्रियते। सम्पूर्णजगतः सत्ता अस्मिन्यज्ञे निहिता, सृष्टेः अन्तेअयमेव अवशिष्यते।

यज्ञदृष्ट्या ब्राह्मणग्रन्थेषु शतपथब्राह्मणस्य महत्त्वमस्ति। मनोरमया रीत्या दैविकविधानस्य याज्ञिकव्यवहारस्य च शिक्षार्थमेव शतपथब्राह्मणं प्रवृत्तमिति यावदुपरितनाद् वर्णनात् स्पष्टमेव।अस्मिन् ग्रन्थे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यज्ञविद्या स्ववैभवपूर्णेन सहालोचकानां सम्मुखे समुपस्थिता भवति। यज्ञीयानुष्ठानस्य क्षुद्रातिक्षुद्रतरस्यापि विधिविधानस्य विशद वर्णनमस्मिन् ग्रन्थेऽस्ति। यज्ञीयक्रियायै हेतुनिर्देशः प्राचीनाख्यानानां सरसविवेचनम्, अस्य ब्राह्मणस्योत्कर्षं प्रदर्शयितुं पर्याप्तमस्ति। पुराणेषूल्लिखितमत्स्यावतारस्य बीजमस्यामेव कथायामस्ति, येनं ज्ञातं भवति यत् केन प्रकारेण ननु मानवीयसृष्ट्या स मत्स्यसहाय्येन जलौघात् त्रातुं समर्थोऽभवत्। जलौघे यदा मानवानां विनाशोऽभवत् तदा पुनः तेन सञ्चितबीजेनैवास्मिन् भूतले तेषां प्रादुर्भावोऽभवत्।

ब्राह्मणग्रन्थेषु विधेः अर्थवादस्य विस्तृतं वर्णनं मिलति। इदं वर्णनं पठित्वा साधारणपाठकः समुद्वेलितो भवति। किञ्चैतेषूद्वेजकविषयसमूहेषु यत्र तत्रात्यन्तरोचकमाकर्षकं महत्त्वपूर्णञ्चाख्यानमपि प्राप्यते।तमसि प्रकाशकिरण इव, दीर्घमरूभूमौ हरितभूमिरिवैतान्याख्यानानि पाठकानामुद्विग्नचित्तय शान्तिदायकानि शीतलानि च भवन्ति। विधिविधानानां स्वरूपस्य व्याख्या एवास्याख्यानस्य जननी अस्ति। किञ्च यदा कदाऽऽख्यानमिदंयज्ञस्य संकीर्णप्रान्तं परित्यज्य साहित्यस्य सर्वभौमक्षेत्रे विचरणं करोति तदा कर्मकाण्डस्य कर्कशता तद्रोद्धुं न शक्नोति। आख्यानमिदं द्विविधं भवति स्वल्पकायमाख्यानम्, दीर्घकायमाख्यानञ्चेति। स्वल्पकायिकेष्वारख्यानेषु तासां कथानां गणना भवति यत्र कथायां समुक्तिताप्रदर्शनं समुल्लिखितं भवति। एतान्याख्यानानि किञ्चिद्भेदेन सहानेकेषु ब्राह्मणेषु समुपलब्धानि सन्ति। ईदृक्षु लघ्वाख्यानेषु कतिपयमुख्यान्येतानि सन्ति वाचः देवान् परित्यज्य सलिले तदनु वनस्पतौ च प्रवेशः। अग्निमन्थनकाले घोटकमग्रेस्थापनम्, देवासुराणां मध्ये बहुविधसंग्रामादिकम्।

एतेषु लघ्वाख्यानेषु यदा कदाऽतीवगम्भीरतात्विकतथ्यानामपि संकेतो मिलति।यद् ब्राह्मणस्य कर्मकाण्डात्मकवर्णनाद् नितान्तं भिन्नं भवति तथा गूढगम्भीरार्थप्रतिपादकमपि भवति। प्रजापतेः प्रार्थनायै शतपथब्राह्मणे यस्य कथानकस्योपक्रमं मिलति तत्तु नितान्तं रहस्यमयमस्ति। श्रेष्ठतांप्राप्तुं वाक्मनसोः कलहः समुत्पन्नोऽभवत्। मनसः कथनमासीद् यन्मयाऽनभिगतवार्ता वाण्या न उच्यते। अस्य कथानकस्याभ्यन्तरे मनोवैज्ञानिकतथ्यस्य विशदः संकेतो प्राप्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाक्यार्थाभिवादः

दीक्षाशर्मा
शोधच्छात्रा (व्याकरणम्)
जरारासंवि जयपुरम्।

वाक्यस्य कोपादेयता चावश्यकता इति विचिन्त्यते, यतोहि सामाजिकः प्राणी मनुष्योऽयमिति। लोकेऽस्मिन् व्यवहारे वाक्यमेव प्रधानं मुख्यञ्च किन्तु वाक्यविषये अनेकानि मतानि समुपलभ्यन्ते तानि अधः प्रस्तूयन्ते।

1 पदसंघातजं वाक्यम् – व्याडिः।
2 पदसमूहो वाक्यमर्थसमाप्तौ – कौटिल्यः।
3 एकार्थः पदसमूहो वाक्यम् – काशिका।
4 पदसमूहो वाक्यम् – तर्कसंग्रहः।
5 शाब्दबोधसहकारिकारणानि आकांक्षायोग्यतासत्ति – तात्पर्याणि – परमलघुमञ्जूषा।
6 वार्त्तिककारभाण्यकाराभ्यां पुराचार्याणां लक्षणानि संग्रह्य वाक्यस्य चत्वारि प्रमुखलक्षणानि गदितानि।
1 आख्यातं साव्यपकारकविशेषणं वाक्यम्।
2 सक्रियाविशेषणं च।
3 आख्यातं सुविशेषणम्।
4 एकतिङ्वाक्यम् (प्रधानम्) इति।

अतः सारांशरूपे वक्तुं पारयामः वयं वैयाकरणाः ''धात्वर्थव्यापारमुख्यविशेष्यकम्'' ''धात्वर्थफलमुख्यविशेष्यकम्''

शाब्दबोधं मन्यमानाः प्रतीयन्ते। एतैः तिङन्तघटितमेव तिङन्तार्थनिष्ठमुख्यविशेष्यताकं वाक्यं स्वीक्रियते।

वाक्यञ्च स्फोटात्मकं तच्च निरवयवं नित्यमखण्डञ्चेति अतः वाक्यार्थोऽपि निरवयवः तथैवाण्डश्च। स च वाक्यार्थः ''प्रतिमात्मकः'' इति शाब्दिकजनैः गद्यते। एवञ्च श्रीमन्नागेशभट्टेनापि स्वीये ग्रन्थे ''परमलघुमञ्जूषायाम्'' सुष्ठुरूपेण वाक्यप्रधानता नित्यताखण्डता प्रतिपादित चेति वर्तते।

वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटश्चेत्यत्र वाक्यस्फोटो मुख्यः प्रधानश्च यतोहि वाक्यस्यैव लोकेऽर्थबोधकत्वात् वाक्यनैवार्थसमाप्तेश्चेति।

''पदसमूहोवाक्यमर्थसमाप्तौ''[1]– न्यायभाष्यकारः।

अर्थात् पदानां तत्समूहः यः निराकांक्षज्ञानप्रतिपादने समर्थः भवति तदेव वाक्यं भवतीति। अन्यस्फोटापेक्षा वाक्यस्फोटरेव मुख्यः हि वाक्यव्यवहारे एव शक्तिग्रहः भवितुम् अर्हति। एतेनैव लोकेऽस्मिन् बोधः सञ्जायते। वाक्येनैव अर्थावसानः निराकाङ्क्षज्ञानञ्च भवति।

---

[1] परमलघुमञ्जूषा 3

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"आधुनिकमनोविज्ञानस्य संस्कृतवाङ्मयनिहितविज्ञानैः सह सम्बन्धः"

डॉ0 दिवाकरमिश्रः
सहायकाचार्यः शिचाशास्त्रविभागीयः
जरारासंविवि जयपुरम

प्राग्वैज्ञानिककाले दर्शनशास्त्रस्याङ्गत्वेन प्रसिद्धस्य आधुनिकमनोविज्ञानस्य स्वतंत्रवैज्ञानिकस्वरूपनिर्धारणे 'विलहेल्म वुण्ट' महोदयैः स्थापितायाः प्रथममनोवैज्ञानिकप्रयोगशालायाः महद्योगदानमिति सर्वैः समालोचकैरङ्गीक्रियन्ते।

वस्तुतः, विज्ञानं एका पद्धतिः मन्यते नहि विषय–विशेषः। एतदर्थमेव दर्शनशास्त्राश्रयात् बहिरागते सति अस्य आधुनिकमनोविज्ञाननामकस्य विज्ञानस्यापि स्वरूपप्रकृतिक्षेत्राध्ययनपद्धत्यादीन् उद्दिश्य विविधाः परिभाषाः कृताः तत्तदाधुनिकैः मनोवैज्ञानिकैः। वर्तमानसमये एतदाधुनिकमनोविज्ञानं तत् विज्ञानं मन्यते, यत्र प्राणि–व्यवहाराणां मानसिक–क्रियाणाञ्च अध्ययनं क्रियते। अपरेषु शष्देषु आधुनिकमनोविज्ञाने प्रेक्षणीयव्यवहाराणाम्, मानसिकक्रियाणाम्, दैहिकप्रकियाणाञ्चाध्ययनं चिन्तन–भाव–मूलप्रकृति–वातावरणजन्यानां घटनाञ्च सन्दर्भे क्रमबद्धरीत्या वैज्ञानिकविधिना च क्रियते। अतो अद्यत्वे **मनोविज्ञानं व्यवहारविज्ञानं मानसिक प्रक्रियाविज्ञानञ्चोच्यते**। ध्यातव्यमस्ति यत् व्यवहारे पशुमानवयोः व्यवहारः तथा च मानसिक–प्रक्रियायां चिन्तन–भाव–संवेगादिभिः सह विविधानुभूतिनाञ्चाध्ययनं सम्मिलितं भवति।

एवमाधुनिकमनोविज्ञानस्य वर्तमानकालिकं स्वरूपं मनसि निधाय यदि वयं संस्कृतवाङ्मयनिहितविज्ञानैः सह अस्य सम्बन्धान्वेषणं कुर्मः तु प्राप्नुमः यत्, संस्कृतवाङ्मयनिहितं विज्ञानम् अतीवगभीरतममस्ति उद्देश्यवैभिन्यवशात्। संस्कृतवाङ्मये पारलौकिकोद्देश्यप्राप्तये जीवात्मा – परमात्मा – मन – चित्त – बुद्धि – अहंकारादीनां तत्वानाम् अवबोधाय वैज्ञानिकं चिन्तनं प्राप्यते, येन जनाः मानवजीवनस्यान्तिमपुरूषार्थसाधने समर्थाः स्युः। एतदर्थमेव निखिलेऽपि संस्कृतवाङ्मये मनोविज्ञाननामकः ग्रन्थः नोपलभ्यते अपितु, विविधेषु शास्त्रेषु तत्तद् प्रकरणेषु मनोविज्ञानस्य श्रेष्ठतमं निदर्शनं प्राप्यते। परञ्चाधुनिकमनोविज्ञाने व्यवहारजगति सफलतायै चिन्तन–भाव–संवेग–मूलप्रकृति–बुद्धि–समायोजनादीनां तत्वानां स्वरूपावबोधाय प्रययते, येन जनाः स्व परिवेशे, समाजे, कार्यस्थले वा समायोजिताः स्युः।

उपर्युक्तोद्देश्यगतवैभिन्येऽपि संस्कृतवाङ्मयवर्णित – प्राणिविज्ञान – शारीरविज्ञान – सांख्यदर्शन – योगदर्शन – न्यायदर्शन – वेदान्तदर्शन – गीतादर्शन – सौन्दर्यशास्त्र – सामुद्रिकशास्त्र – तत्वमीमांसा – ज्ञानमीमांसदिभिः सह आधुनिकमनोविाानस्य सम्बन्धः दरीदृश्यते।

वस्तुतः, एतैः संस्कृतवाङ्मयनिहितविज्ञानैः सह आधुनिकमनोविज्ञानस्य सम्बन्धमीमांसैव अस्मिन् शोधालेखे कृता वर्तते। लेखकस्य दृढ़विश्वासोस्ति यत् आधुनिकमनोविज्ञानाध्ययनसरणीमनुश्रृत्य यदि संस्कृतवाङ्मयनिहितविज्ञानाध्यनमनुशंसते तु न केवलं वर्तमानवैश्विकपरिप्रेक्ष्ये संस्कृतज्ञानविज्ञानयोः प्रसारो भविष्यति, अंपितु, अखिलेऽपि विश्वे संस्कारसम्पन्नाः व्यवहारकुशलाश्च जनाः विकसिताः भविष्यन्ति। सहैव आधुनिकमनोविज्ञानस्य स्वरूपविकासोऽपि भविष्यतीति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीमद्भगवद्गीतायां कर्मयोगविमर्शः

डॉगेह प्रदीप शर्मा

आध्यात्मिक वाङ्मये भागवद्गीतायाः स्थानं असाधारणमपि च आदिस्थानं अलंकरोति । भगवद्गीता एव भारतीयानां आध्यात्मिकतायाः प्रामाणिको ग्रन्थः इति मन्यन्ते । वेदानां अन्तिमभागः उपनिषदः वेदसारज्ञानं ते प्रबोधयन्ति । भगवद्गीता उपनिषदां सारः इति लोकोक्तिः प्रचलति यथा–

सर्वोपनिषदो गावः दोग्धा गोपालनन्दनाः।

पार्थो वत्ससुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

श्रुतिस्मृतिपुराणेतिहासरूपं पञ्चमवेदं महाभारतं वेदव्यासः लोकहिताय आविष्कृतवान् । सर्वे मानवाः संसारचक्रे निबद्धन्तः आत्मतत्त्वं सम्यक् अवलोकयितुं न समर्थाः। तेषां कृते एव लोकहिते रतः श्रीकृष्णपरमात्मा भगवद्गीतां पेरबोधयत् । अतः भगवद्गीता घोरं संसारसागरं तर्तुं समर्थाः।

एकं सद्विप्रा बहुधा वदन्तीति श्रुतिमाश्रित्य एकं सन्तं महात्मानं बहुरूपेण प्रपञ्चयति इति प्रपञ्चः–

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

इति भगवद्गीता प्रमाणाश्च । इतः पूर्वमेव भगवद्गीता उपनिषत् सारमिति उक्तम् । सम्पूर्ण भगवद्गीता नरनारायणयोः सम्भाषणरूपेण वर्तते । अत्र नरः अर्जुनः, नारायणश्च श्रीकृषणः इति । कुरुक्षेत्रे अर्जुनस्य विषादं दूरीकर्तुं तस्य वास्तविकतत्त्वं संसूच्य अर्जुनस्य अज्ञानं अत्यन्तं शोचनीयमिति निरूपयामास।

कुतस्त्व कश्मलमिदं विषमे समुपस्थितम् ।

अनार्यजुष्टमस्वर्ग्यम् अकीर्ति करमर्जुनम् ॥

एवम्प्रकारेण सर्वेषां मानवानां अज्ञानं उत्पाठ्य विवेकयुक्तान् कर्तुं प्रयतते स्म ।

भगवद्गीतायां प्रदर्शिताः भिन्नमार्गाः भिन्नमनुष्याणां सुलभोपायमार्गाः न तु वैरूध्यमतानि इति सम्यक् अवगन्तव्यम् । भगवद्गीता कर्म, भक्ति, ज्ञानरूपी त्रीन् मार्गान् उपदिशति । त्रयः मार्गाः अपि अत्यन्ताचरणीयात्मकाः इति वक्तुं शक्यते ।

कर्मयोगं अनुसर्तुं चतुर्विधलक्षणानि आवश्यकमिति विस्तरेण श्रीमद्भागवद्गीतायां प्रतिपादितमस्ति । यथा–

1 स्वधर्माचरणम्–

श्रेयान् स्वधर्मोविगुणः परधर्मास्त्वनुष्ठितात् ।

स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

2 असक्तबुद्धिः–

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।

कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

3 कर्मफलत्यागः—

श्रेयो हि ज्ञानमभ्यासात् ज्ञानाध्यानं विशिष्यते ।

ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥

4 परमेश्वरार्पणम्—

ब्रह्मार्पणं ब्रह्महविर्ब्रह्मोग्नौ ब्राह्मणाहुतम् ।

ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना ॥

एवम्प्रकारेण सम्पूर्ण भागवद्गीतायां बहुत्र कर्मयोग विषयक चर्चा प्राप्यते । अस्मिन् शोधपत्रे इतोऽपि भागवद्गीतायां वर्णित कर्मयोगविषयाः वर्णनं कृतो वर्तते । यः वर्तमान समाजस्य कृते दर्पणरूपेण मार्गदर्शनं स्व दर्शनञ्च कारयिष्यति इत्याशयः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याकरणे वाग्विज्ञानस्य उपादेयता

गोविन्द सहाय गौड़
शोधच्छात्रः, राष्ट्रियसंस्कृतसंस्थानम्
जयपुरपरिसर

वाचो हि जनानां भावनायाः अभिव्यक्त्यर्थं साधनरूपेण वर्तते। वाचो बहूनि नामानि प्रयुज्यन्ते यथा - ब्राह्मी भारती भाषा गीः वाक् वाणी सरस्वती। वाण्या एव शब्दानां अर्थज्ञानं जायते। ज्ञानस्य स्रोतांसि वेद कथिताः। त एव अस्माकं संस्कृतेः आदर्शभूताः सन्ति। वेदाङ्गेषु व्याकरणस्य वेदमुखत्वेन प्रयोगो भवति मुखेनैव शब्दाभिव्यक्तिः जायते। तेन व्याकरणं भाषाशास्त्रं गदितम्। अस्मिन्नेव वाग्विज्ञानम् अन्तर्निहित वर्तते। वाणी लोकव्यवहारं प्रवर्तयति। सा एव वाक्तत्त्वरूपेण जगति प्रतिष्ठिताऽस्ति। यदि शब्दरूपा वाक् न स्यात् तर्हि जगदिदमन्धंतमसि निमज्जेत्। वाण्या सत्यवर्त्मनि प्रतिष्ठा जायते। सा ज्योतिरूपेण संसार द्योतयति।

यथोक्तं दण्डिना –

'इदमन्धंतमः कृत्स्नं जायते भुवनत्रयम् ।यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।'[2]

भाषायाः शुद्धये वाग्विज्ञानस्य ज्ञानम् आवश्यकं भवत्येव। न हि वाग्विज्ञानस्य ज्ञानेन अज्ञः साधून् शब्दान् प्रयोक्तुं शक्तः। सार्थकशब्दानां समष्टिप्रयोगः वाग्विज्ञानस्य मुख्यो विषयः। व्याकरणशास्त्र वाग्विज्ञानं प्रतिपादयति।

पतंजलिना वाचः सन्दर्भे कथितम् –

'चत्वारि शृङ्गाः त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्ता सोऽस्य।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश।।'[3]

अस्य वृषभरूपी शास्त्रस्य चत्वारि शृङ्गाणि कथितानि – नाम–आख्यात–उपसर्ग–निपात–रूपाणि त्रिपादोऽस्य भूत–भविष्य–वर्तमानाः। सुप्तिङन्तश्च द्वे शीर्षे स्तः, सप्तविभक्तयश्च सप्तहस्ताः सन्ति। उरसि शिरसि च कण्ठे त्रयो बद्धो वृषभोऽयमस्ति ।

एवंविधव्याकरणज्ञानाद् यो जनोऽनभिज्ञो वर्तते स जानन्नपि न जानाति, पश्यन्नपि न पश्यति शृण्वन्नपि न शृणोति। किंच यो हि जनो व्याकरणशास्त्रज्ञोऽस्ति, तत्सन्निधौ वाणी सुसज्जिता कामिनीव समागत्य सर्वतोभावेन समर्पिता भवति।

भर्तृहरिणा वाक्यपदीये वाचो विषये गदितम् –

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्। अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ।।[4]

अर्थात् श्रोत्रयोः विषयरूपत्वेन प्रतिष्ठिता वाक् वैखरी गद्यते । सामान्यजनाः वैखर्याः प्रयोगं कुर्वन्ति वैखरीरूपेण वाक् दुन्दुभौ वेणौ च सन्निहिता वर्तते। तस्याः ध्वनिः विषयत्वेन गृहीतः। मध्यमा वाक् अन्तःसन्निवेशिनी भूत्वा प्राण एव संचरति। मध्यमावाचो नादः स्फोटात्मकः कथितः। सा बुद्धिमात्रोपादान वर्तते। शब्दसाधुत्वज्ञानेन लभ्यमाना पश्यन्ती वाक्। सा एव सूक्ष्मनादरूपेण व्यवस्थिता। भर्तृहरिणा वाच रूपत्रयं स्वीकृतम्। पश्यन्ती परारूपेण शब्दब्रह्मरूपेण च व्यवह्रियते। एवं वाग्विज्ञानस्य प्रतिपादनं बहुभि भाास्त्रवचोभिः कृतम्।

---

2 काव्यादर्शः 1.4

3 ऋग्वेदः 4 58 6 पातंजलमहाभाष्यः

4 वक्यपदीयम् 1 159

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिक्षायां सूचनाप्रौद्योगिक्याः वैश्विकचिन्तनम्

डॉ हरिओम शर्मा
सहायकाचार्यः, शिक्षाशास्त्र–विभागः
राष्ट्रियसंस्कृतसंस्थानम् जयपुरपरिसरः जयपुरम

परिवर्तनशीलेऽस्मिन् संसारे बुद्धिमान मानवः सम्प्रति अल्पीयसी काले अल्पेनैव श्रमेण पूर्वापेक्षया अधिकफलप्राप्त्यर्थं निरन्तरं प्रयतमानो वर्तते। मानवस्य एतादृशः प्रयासः एव समाजे श्रेष्ठस्थानप्राप्तये तस्य साहाय्यं विदधाति। इदानीन्तनकाले मानवजीवनस्य प्रत्येकपक्षः वैज्ञानिकानुसन्धानैः आविष्कारैश्च प्रभावितो विद्यते। तैः मानवानां दृष्टिरपि वैज्ञानिकी सञ्जाताऽस्ति, तथैव शिक्षाक्षेत्रेऽपि आधुनिकोपकरणानाम् आविर्भावेन शिक्षणेऽपि यान्त्रिकीकरणमुच्यते। अधिकसामर्थ्यलाभार्थं मानवसृष्टा इयं प्रविधिविद्या वैदेशिकी सत्यपि अस्माकं शब्दभण्डागारेजमबीदवसवहल इत्यांग्लशब्दः प्रभावं विस्तारयति। व्यवहारे समुचितपरिवर्तनमेव हि शिक्षणम्। किं नाम व्यवहारः? अत्र शास्त्रीयरूपे अस्य निर्वचनं स्वीकुर्यात् तर्हि नानासन्देहहरणाद् व्यवहारः इति। यथा– कोऽपि कथयति यत् इदं क्षेत्रं मदीयमिति, अन्यः अपि कथयति यत् इदं क्षेत्रं मदीयमिति, अनयोः मध्ये विवादः जायते, अतः विवादशमनार्थं यद् किमपि व्यवहरति, व्यवहार इत्योच्यते। परञ्च शिक्षायाः क्षेत्रे एकोनविंशतिशताब्द्यां मनोविज्ञानस्य यद् स्वरूपमस्माकं पुरतः आगच्छति, तस्मिन् स्वरूपे व्यवहारः एव मानवस्य स्वरूपम् उत कार्यक्षेत्रं निर्धारयति। तत्र पूर्वमपि मनोविज्ञानं आत्मनः विज्ञानं–मस्तिष्कस्य विज्ञानं– चेतनायाः विज्ञानम् इत्यादिषु विविधरूपेषु प्रस्फुरितम्। अन्ते वुडवर्थमहोदयेन प्रतिपादितं यत्– मानवव्यवहाराणाम् अध्ययनमेव मनोविज्ञानं वर्तते। शिक्षणक्षेत्रे मनोविज्ञानस्य ज्ञानमपि अत्यावश्यकं वर्तते, इति अपरा वार्ता यत् शिक्षायाः क्षेत्रे मनोविज्ञानस्य या शाखा विहिता वर्तते, यथा किमपि परिवर्तनमपेक्ष्यते। तत् तु सर्वम् अस्माकं पुरतः अस्माकं व्यक्तित्वस्य आधारभूतदृष्टिकोणमुपस्थापयति। पूर्वमपि कथितं यत् व्यवहारेण एव परिवर्तनं जायते। व्यवहारे परिवर्तनं शिक्षणेन जायते तथा शिक्षणेन खलु अधिगमः भवति। शिक्षणाधिगमप्रक्रियायां जायमानानां समस्यानां परिहारार्थं शिक्षाविद्भिः काले–काले नव–नवविधयः आविष्कृताः वर्तन्ते। एतान् अभिनवविधीन् उपयुज्य शिक्षकाः शिक्षणक्रियां सफलां रुचिकराम् आकर्षिकां च कर्तुं सर्वदा प्रयतन्ते। एतदर्थं शिक्षायां सूचना प्रौद्योगिक्याः प्रभावः परिलक्ष्यते।

साम्प्रतं प्रत्येकं ज्ञानक्षेत्रे निरन्तरविकासत्वात् सर्वत्र दृष्टिः प्रसारयितुं न शक्यते। तदनुगुणैव अल्पेनैव श्रमेण अल्पीयसी काले बहून् विषयान् ज्ञातुं सम्प्रयते मानवः। न केवलं ज्ञानप्राप्तिक्षेत्रे अपि तु शिक्षणस्य, शिक्षणदानस्य क्षेत्रे पूर्वोक्तरीत्या अल्पश्रमेण अल्पसमये च बहुषु छात्रेषु अधिगमोत्पादनं कर्तुं प्रयतते। एतत् सर्वं समाधातुं प्रविधिरेव प्रभवति। वैषयिकज्ञानकौशलम् इत्यपि इत्यस्य नामान्तरं ज्ञानस्य यान्त्रिकीकरणत्वात् सम्प्रति शिक्षा कठिनत्वेन गोपनीयत्वेन वा नावलोक्यते। मानवसमाजस्य एकैकेन विषयेण सह यन्त्राणि सर्वतोभावेन संश्लिष्टानि सन्ति। परिणामतः जीवनधारणस्य मूल्यमुन्नतं जायमानं वर्तते। आकाशवाणी, ध्वनिपञ्जिका, प्रक्षेपिका, दूरदर्शनं चलचित्रम् इत्यादीनां शिल्पानां साहाय्येन शिक्षायाः मूल्यमद्य समृद्धं जातमस्ति। सर्वोपरि सङ्गणकयन्त्रस्य उद्भावनं, शिक्षाक्षेत्रे तस्य प्रयोगः शिक्षया सह प्रविधिज्ञानं शिक्षादर्शनं शिक्षामापनं मूल्याङ्कनम् इत्यादि शिक्षानीतिवत् शैक्षिकप्रविधिशास्त्रेऽपि सूचनाप्रौद्योगिक्याः वैश्विकचिन्तनं मया अत्र अन्ताराष्ट्रियसङ्गोष्ठ्यां चितम्।।4

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सौरमानसमीक्षणम्

डॉ शिवाकान्तमिश्रः
सहायकाचार्यः, ज्योतिशविभागः,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतवि ववविद्यालयः,जयपुरम्,

ज्योतिषशास्त्रे गणनात्मककालस्य द्विविधत्वमाचार्यैः कल्पितम्। मूर्त्तकालः अमूर्त्तकाल च। अमूर्त्तकालस्यातिसूक्ष्मत्वात् व्यवहारे प्रयोगवाह्यः अर्थात् दैनिककार्याणां सम्पादने न प्रयुज्यते परं स्थूलत्वात् मूर्तकालः व्यवहारोपयोगीः भवति। अस्य स्थूलात्मकस्य खण्डकालस्य नवविधानि मानानि त्रिस्कन्धात्मकज्योतिषशास्त्रस्य सिद्धान्तस्कन्धे भास्करादिभिराचार्यैः कल्पितानि। मीयते अनेन इति मानम् अर्थात् येन मीयते तत् मानम् । अतः येन कालं मीयते तत् कालमानम् । भारतीयसिद्धान्तग्रन्थेषु स्थूलकालस्य नवधा मानानि उक्तानि । यथोक्तं सूर्यसिद्धान्ते –

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम् । सौर च सावनं चान्द्रमार्क्षं मानानि वै नव ।।

अर्थात् ब्राह्मं, दिव्यं, पित्र्यं, प्राजापत्यं, गौरवं, सौरं, सावनं, चान्द्रं, नाक्षत्रं चेति कालस्य नवधा मानानि सन्ति। मानवव्यवहारे सौरसावनचान्द्रार्क्षेति चतुर्भिरेव मानैः सर्वं कार्यसंचालनं भवति। ब्राह्म–दिव्य–पित्र्य–प्राजापत्यैर्मानैः सर्वदा व्यवहारो न भवति।

चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः । ब्रार्हस्पत्येनाष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः ।।

नारदमतानुसारं नवविधकालमानेषु सौरसावनचान्द्रनक्षत्रगौरवेति पंचमानानि मानवैः प्रयोज्यानि भवन्ति। तद्यथा –**एषां तु नवमानानां व्यवहारोऽत्र पंचभिः ।**

एषां नवविधकालमानानां प्रमाणं भिन्नं–भिन्नं भवति। एशां गणना मध्यममानेनैव क्रियते यतोहि स्पश्टमानं प्रतिक्षणं विलक्षणं भवत्यर्थात् स्पश्टमानं स्थिरं न भवति। नवविधेषु कालमानेषु सर्वाधिकलघुमानं चान्द्रमानस्य तथा महत्तमं मानं ब्राह्ममानम्। अतः क्रमेण चान्द्रमानं, नक्षत्रमानं, सावनमानं, सौरमानं, पैत्रमानं, गौरवमानं, दिव्यमानं, प्राजापत्यमानं, ब्राह्ममानमिति एतानि नवमानानि उत्तरोत्तराणि महत्तानि भवन्ति अर्थात् चान्द्रमानात् नाक्षत्रमानं, नाक्षत्रमानात् सावनमानं, सावनात् सौरमानं, सौरात् पैत्रं, पैत्रात् गौरवमानं, गौरवात् दिव्यं, दिव्यात् प्राजापत्यं, प्राजापत्यमानात् ब्राह्ममानमधिकं च भवति। एशु नवविधेशु कालमानेषु चतुर्णामेवमानानां चान्द्रार्क्षसौरसावनानां व्यवहारो लोके जायते। कस्य कालमानस्य केषु–केषु कार्येषु लोके व्यवहार इति भास्कराचार्येण उक्तं –

वर्षायनर्तुयुगपूर्वकमत्र सौरान् मासास्तथा च तिथयस्तुहिनांशुमानात् ।
यत् कृच्छ्रसूतकचिकित्सितवासराद्यं तत् सावनाच्च घटिकादिकमार्क्षमानात् ।। सिशिमभलो31

वर्षायनर्तुयुगादिकं सौरमानात् प्रवर्तते अर्थात् रवे चलनादुत्पद्यते, मासास्तिथय च चान्द्रात् अर्थात् चन्द्रस्य गतिवशादुत्पद्यन्ते। घटिकादिकं नाक्षत्रादेव प्रवर्तते। व्रतोपवासचिकित्सितसूतकवासराद्यर्कसावनात् च प्रवर्तन्ते। सूर्यसिद्धान्तानुसारं दिनरात्र्योर्मानं, षड्शीतिमुखानि, अयनद्वयं, विषुवद्दिनं, संक्रान्तेः पुण्यकाल च सौरमानेन प्रयुज्यते।

रवेः एकराशिसंक्रमणकालादपरराशिसंक्रमणकालं यावत् त्रिंशद्भिरंशैरेको सौरमासो भवति। अतः रविसंक्रान्त्युपलक्षिता मेषादयो द्वादशराशय एव द्वादशमेषादय सौरमासाः भवन्ति। सूर्यबिम्बकेन्द्रस्य मेषराशिप्रवे शकालादन्यराशिप्रवेशकालं यावदेकः सौरमासः मेषमाससंज्ञकः। एवमेव यस्मिन् राशौ सूर्यस्य संक्रमणं भवति तस्य राशेः नामानुसारं सा संक्रान्तिः सौरमास च भवति। एकस्मिन् सौरवर्षे मेष–वृष–मिथुन–कर्क–सिंह–कन्या–तुला–वृश्चिक–धनु–मकर–कुम्भ–मीन चैते द्वादशसौरमासैरेकं सौरवर्षं भवति। सूर्ययावता कालेन पूर्वगत्या मेषादयद्वादशराश्यात्मकं भचक्रं भ्रमति तावत्प्रमाणं सौरवर्षमिति । यथोक्तं भास्करेण –**"रवे चक्रभोगोऽर्कवर्षं प्रदिष्टमिति"**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाभारतकालीनसमाजः

डॉ लोकेशकुमारशर्मा,
प्राचार्यः,
रविशिक्षकप्रशिक्षणमहाविद्यालयः,
नेवटा, जयपुरम्

रामायणस्यानन्तरं सांस्कृतिकदृष्ट्या सर्वाधिकं महत्त्वपूर्णो ग्रन्थोऽस्ति महाभारतम्। महाभारतं भारतस्य तात्कालीनाः धार्मिक–सामाजिक–राजनीतिक–क्रियाः, मान्यतास्तथा परम्पराः उपस्थापयति। महाभारतस्य विहङ्गमदृष्ट्या अवलोकनेन ज्ञायते यत् तात्कालीनः समाजः रामायणकालस्य समाजस्य अपेक्षया शिथिलव्यवस्थोपेत अभवत्। मनुष्यस्य आध्यात्मिकी वृत्तिः लुप्तप्राया सतां भौतिकवादितां प्रति उन्मुखी सञ्जाताऽभवत्। अहंकारस्य उत्पत्तौ कर्तृभावस्य स्थापनमभवत्। समाजस्य दृढानि सामाजिकबन्धनानि शिथिलान्यभवन्। तत्र सामञ्जस्यं दृष्टं न अभूत्, यद् रामायणकालीने समाजे विद्यमान आसीत्। संक्षेपेण वक्तुं शक्यते यन्महाभारतकालीने समाजे वर्णव्यवस्थायाः शैथिल्यस्य, अनीतेः अवतरणस्य, वैवाहिकसंस्कारस्य पतनावस्थायाः, धर्मस्य स्खलितावस्थायाः, अहन्तायाः चरमसम्रिः आदीनाम् उद्भवः सञ्जात आसीत्। एतत्सन्दर्भाणां परिप्रेक्ष्ये वयं महाभारतकालीनसमाजस्य वर्णनं कर्तुं विचारयिष्यामः।

1 वर्णव्यवस्था

2 आश्रमव्यवस्था

3 सामाजिकबन्धनानां शैथिल्यम्

4 विवाहः

5 स्त्रीणां दशा

6 अनीतेः अवतरणम्

7 धर्मस्य स्खलनम्

8 अहंकारस्य पराकाष्ठा

9 अशान्तेः साम्राज्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।।लक्षणाविचारः।।

मदन लाल सूमरा
शोधच्छात्र
साहित्य विभाग
जरारासंविवि

सर्वेष्वपि शास्त्रेषु शब्दार्थयोः सम्बन्धस्वरूपवृत्तिनिरूपणं स्वस्वशास्त्रसिद्धान्तमर्यादानुगुणं क्रियते। अलंकारनये च सा त्रिविधा स्वीकृता अभिधा लक्षणा व्यजंना चेति[5]। तत्र सकेतितार्थगोचरः शक्तयारण्यः अर्थस्य शब्दगतः शब्दस्य अर्थगतो वा सम्बन्धविशेषः अभिधा[6]। शक्यसम्बन्धो लक्षणा[7] इति लक्षणा लक्षणम्। अत्र अभिधावृत्तिबोध्यः अर्थः वाच्यः शक्यश्च कथ्यते। तस्य च शक्यार्थस्य अन्येण तात्पर्यविषयीभूतेन अर्थेन सह सम्बन्धः लक्षणा। स च सम्बन्धः अनेकधा। यथा गगनयां घोषः इत्यादौ शक्यस्य प्रवाहस्य तीरे सामीप्यं सम्बन्धः। मुखं चन्द्रः इत्यत्र सादृश्यं सम्बन्धः एवं तीरे विद्यमानस्य शक्यप्रवाहसम्बन्धस्य एव लक्षणा इति नाम। एवं प्रवाहसम्बन्धितीरमित्याकारकं लक्षणाज्ञानं लक्ष्यार्थस्य तीरस्य उपस्थितौ हेतुः। पुनः तादृशउपस्थितिद्वारा सा लक्षणा गदापदात् तटसम्बन्धितीरविषयकशाब्दबोधे कारणं भवति।

तस्याश्चार्थोपस्थापकरने न केवलम् अन्वयानुपपत्तिः, न वा केवलं तात्पर्यानुपत्तिः बीजम्[8]। तथा हि गडयां घोषः इत्यादिस्थलेषु शक्यतावच्छेदकप्रवाहत्वेन रूपेण लक्ष्यस्य तीरस्य बोधः। यतः प्रवाहत्वव्याप्यस्य शैव्यपावतत्वस्य तीरे प्रतीतिः, तत्र तीरे प्रवाहत्वज्ञानं विना न संभवति। अतः तीरेवृत्तेः घोषान्वयितायाः अवच्छेदकता मुख्यार्थतावच्छेदके प्रवाहत्वे विद्यते एव परन्तु न तत्र अभावः। तात्पर्यविषयान्वयितावच्छेदकताभावः न लक्षणायाः अर्थोपस्थापकत्वे कारणम्।।

गङायां घोषः इत्यत्र मुख्यार्थतावच्छेदकरूपेण प्रवाहत्वेन मुख्यार्थस्य प्रवाहस्य प्रतियोगिकता मीनशैवालाधन्वये, न तु तात्पर्यविषये घोषान्वये। अतः अत्र तात्पर्यविषयघोषान्वये मुख्यार्थतावच्छेदकप्रवाहत्वेन रूपेण मुख्यार्थप्रतियोगिकतायाः अभावः इति उक्तप्रकारं लक्षणासंगतिः। पुनः काकेभ्यो दधि रक्ष्यतामित्यत्र काकस्य दधिरक्षायां सर्वथा अन्वयाभावः, नास्ति। परं काकत्वेन काकस्य दधिरक्षायां नान्वयः अपि तु दध्युपधातकत्वेनैव अन्वयः। एवं च दधिरक्षासम्बन्धस्य प्रतियोगिकता काके, किन्तु प्रतियोगिकतावच्छेदकं न काकत्वम् अपि तु बिडालमूषकादिसाधारणं दध्युपधातकत्वम्। तथा चात्र मुख्यार्थतावच्छेदक कात्वरूपेण तात्पर्यविषयदधिरक्षान्वये मुख्यार्थकाक प्रतियोगिकतायाः अभावः। इत्यंनिरूपित तात्पर्यनुपत्तिरेव लक्षणायाः कारणत्वेवक्ता कस्मिन्नपि (अर्थ) तात्पर्ये किमपि वदेत् यत्र लक्षणोपस्थितिः अनवस्थिता स्थाल्। तस्मात् लक्षणायाः नियामकतया रूढिप्रयोजनयोः एकतरं च तात्पर्यानुपपच्या सह कारणं भवति।
अत्र प्राचीनानाम्–

शब्दण्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुनः लक्ष्यमाणत्वमुच्यते।।
शक्यसम्बन्धेन अशक्य (प्रतीति) प्रतिपत्तिः लक्षणा।।
मुख्यार्थबाधात् अन्योऽर्थः यल्लक्ष्यते सा लक्षणा।। इति वृत्तयः।
लक्षणानि न युज्यन्ते। यतः बोधस्य कारणमेव लक्षणादि।।

---
[5] वृत्तिवार्तिकम्,
[6] रसंगधरः द्वितीयपरिच्छेदः
[7] रसंगधरः द्वितीयपरिच्छेदः
[8] रसंगधरः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न तु तत्स्वरूप एव। प्राचीनास्तु बोधस्वरूपत एव लक्षणां लक्षितवन्तः इति दोषः। यदपि "मुख्यार्थसम्बन्धेन शब्दस्य प्रतिपादकत्वम्"[9] इति वृत्तिवार्तिके लक्षणा लक्षिता तदपि न सङ्च्छते। अत्र आत्माश्रयरूपः दोषः विद्यते। तथाहिप्रतिपादकत्वं नाम प्रतिपत्तिनिष्ठधर्मविशेषः। परन्तु तादृशधर्म विशेषज्ञानं कस्यापि अर्थस्य उपस्थितौ कारणं न भवति। यतः एतत्पदनिष्ठं प्रतिपादकत्वमस्तीत्यनेन ज्ञानेन न कस्यापि अर्थस्य स्मृतिः, तस्मात् कथं नाम प्रतिपादकत्वं लक्षणायाः लक्षणम्? अय यद्युच्येत प्रतिपादकत्वं नाम प्रतिपदच्यनुकूलव्यापारः, स च ज्ञातः सन्नेव उपयुज्यते प्रतिपत्ताविति तथापि मुख्यार्थसम्बन्धेन इति लक्षणघटकतृतीयान्तपदेन शक्यसम्बन्ध एव प्रतिपत्तिहेतुत्वेन विवक्षित इति प्रतीयते। तेन प्रतिपत्तिहेतुभूतया वाक्यसम्बन्ध रूपया लक्षणया प्रतिपादकत्वं लक्षणा इति पर्यवसन्नं लक्षणम्। अत्र लक्षणाज्ञाने लक्षणा ज्ञानस्यैव हेतुत्वात् आत्माश्रयरूपो दोषः।।

इयं च लक्षणा द्विविधा–निरूढा, प्रयोजनवती[10] इति। अनादिप्रयोगप्रवाहवशेन एकवस्तुप्रवणत्वात् शब्दस्य अन्यार्थे रूढत्वम् निरूढा–द्विभेदा चेयम्–अत्र लावण्यातु कूलानुगुणादयः उदाहरणम्। प्रयोजनवती पुनः गौणी शुद्धा इति द्वेधा। गौणी लक्षणा सारोपा साध्यवसाना इति द्विविधा। तत्र विषयविषयिणोः पृथङ्गिर्दिष्टयोः। अभेदः आरोपः। यत्र लक्षणायामारोपः सा सारोपा। अत्र मुखं चन्द्रः इत्यादीनि उदाहरणानि।।

विषयिप्रतिपादकैः चन्द्रादिशब्दैः लक्षणया उपस्थापितानां चन्द्रादिसदृशानाम् अभेदसंसर्गेण मुखादिशब्दोपस्थापितैः मुखत्वादिविशिष्टैः मुखादिभिः अन्वयः। यतः निपातारिक्ततामार्थयोः अभेदातिरिक्तः सम्बन्धः नोपपद्यते। एवमत्र मुखचन्द्रयोः पृथङ्गिर्दिष्टयोः विषयविषयिणोः सादृश्यप्रयोजनात् अभेदान्वयः। अतः अत्र गौणी सारोपा लक्षणा। एवम् अपृथङ्गिर्दिष्टे विषये विषय्यभेदः अध्यवसानम्[11]। साध्यवसानायाः पुरेऽस्मिन् सौधशिखरे चन्द्रराजी विरानते इत्युदाहरणम्। सौधशिखरस्थितौ मुखत्वविशिष्टमुखप्रतियोगिकता अत्र चन्द्रप्रतियोगिकत्वाभावः। चन्द्रत्वेन अत्र मुखत्वविशिष्टस्य लक्षणया बोधात् सौधशिखरस्थिव्यन्वयः।।

शुद्धा पुनः जहरस्वार्था अजहहत्स्वार्था सारोपा साध्यवसाना इति चतुर्विधा। गङ्गायां घोषः इत्यत्र गङ्गापदं प्रवाहरूपं स्मर्थं जहाति लक्षणया तीरं बोधयतीति जहत्स्वार्था इयं लक्षणा। काकेभ्यो दधि रक्ष्यतामित्यत्र काकशब्दः मुख्यार्थात्यागं विनापि दध्युपघातकं सर्वं लक्षयति इत्यत्र अजहत्स्वार्था लक्षणा।।

दर्पणकारैः यल्लक्षणायाः अशीतिर्भेदाः प्रपण्चिताः[12] तत् लक्षणाया विशुद्धस्वरूपविश्लेषणात्मिकया दृष्टया कृताः। काव्यप्रकाश–रसंगधरादिषु तु अस्या द्वित्राधिकदशभेदा एव परिगणिताः। अत्र तु लक्षणाविचारः सर्वथा काव्यचमत्कृतिमाधारीकृत्यैव कृतः। तस्मात् अलंकारशास्त्रोपयोगिन एव भेदा अत्र उक्ताः। अत एव जहदजहत्स्वार्थापि लक्षणा अलंकारशास्त्रे अनुपयोगिनी नात्र आलंकारिकैः सा स्वीत्रिक्यते। निरूढालक्षणाभेदेपि आलकांरिकाणामरूचेः कारणं तस्य चमत्कृत्यनाधायकत्वमेव। निरूढायाः न व्यंजने उपयोगः न वाऽलंकारे।

गौणी सारोपायाः रूपके,"साध्यवसानायाः अतिशयोक्तौ शुद्धा सारोपायाः साध्यवसानायाश्च हेत्वलंकारे, जहत्स्वार्थायाः अत्यन्ततिरस्कृतवाच्यध्वनौ, अजहत्स्वार्थायाः अर्थान्तरसंगमित्वाच्यध्वनौ च उपयोगः।।

---

[5] वृत्तिवार्तिकम्,

[6] काव्यप्रकाशः।

[11] चित्रमीमांसा– रूपकप्रकरणम्

[12] साहित्यदर्पण – द्वितीयपरिच्छेदः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतासाहित्ये नारीणां वैशिष्ट्यप्रतिपादनम्

ममता कुमारी जाट
शोधच्छात्रा
जरारासंविवि

अस्माकं भारतीयानां संस्कृतौ नारीणां भूमिका महत्त्वपूर्णा वर्तते। भारतीयसंस्कृतौ मातृशक्तेः सम्मानमेवं वैशिष्ट्यं वर्तते। यत् अद्यत्वेऽपि भारतीय संस्कृतेर्महत्वं विदेशेऽपि स्वीक्रीयते। एतस्य प्रमुखं कारणं मातृशक्तिसम्मानमेव प्रतिभाति। योषित स्त्री–महिला प्रभृतयः नारी इत्यस्य पर्यायवाचीनः शब्दाः सन्ति। नारीणां स्थानम् अतीव गौरवपदमासीत्। यस्मिन् गृहे योषिताम् आदरः भवति तत्र देवाः निवसन्ति इति अस्माकं स्मृति शास्त्रेषु उक्तमस्ति–

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्रा फला किया:।।"[13]

समाजे एका एव नारी भिन्ना भिन्ना भूमिकासु तिष्ठति। क्वचित् मातृरुपेण, क्वचित् जाया रूपेण, क्वचित् भगिनी रूपेण। परन्तु एतासु भूमिकासु तस्याः मातृ भूमिका सर्वोपरि परिगणिता भवति। पत्नीरूपेण सा गृहस्वामिनी पदमलंकरोत् श्वसुर श्वश्वादिषु तस्या अधिकारो मन्यते स्म।

लोकजीवने यथार्था अर्थवत्तमास्तथैव वेदे स्वगौरवगरिम्णातिस्पृहणीयं श्लाघ्यं च पदम् अलंकुर्वन्त्यो नार्याः कामपि विशिष्टां नान्यदुच्छिष्टां विभामादधाति। तत्र हि 'स्त्री हि ब्रह्मा बभूविथ' इति उक्त्वा ताः सातिशयादरार्हा अमीमनम्। सा एव गृहे लक्ष्मीः सरस्वती, साक्षात् श्री चेति। पारस्करस्तु निजे गृह्यसूत्रे तासां गौरवगाथां सगौरवमघासीत्। मनुरपि विस्पष्टं **नार्यादरमन्वयकल्याणकारणं प्रत्यपीपदत्**[14] । तस्मात् ताः सुवस्त्राभूषणादिभिरलंकरणीयाः।

नारीषु लज्जा–शील–सौन्दर्य–कला–ममता–ज्ञानानि तथा भूतानि भवन्ति यानि जनिजुषां मनांसि विशेषेणाकर्षयन्ति। एतस्य खल्वाकर्षणस्य मूले तासां हार्दिकी विशुद्धिरार्जवं नि छलत्वं च वरीवर्ति, यद्धि समानगुणशीलवन्तं पुमांसमावर्जयति। तदीये रुपसौन्दर्ये मदीयं मोहकत्वं भवति। एतेनात्मातिचुम्बकीयेन आकर्षणेन सौन्दर्यप्रेमिजनाँस्तथैवाकर्षयति यथा सुविकसितानि सुमानि मिलिन्दवृन्दम्। दृष्टेव एतामसौ सहसा एव ब्रवीति–**"अहो लब्धं नेत्रनिर्वाणं"**[15] ।

---

[13]मनु.3/56
[14]मनु.3/56
[15]अभिज्ञान.अंक 3

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैदिकवाङ्मयेषु नारीणां वैशिष्ट्यप्रतिपादनम्

ममता जाखड़ शोधच्छात्रा (व्याकरणम्)
जरारासंवि जयपुरम्।

ऋग्वेदे बहुत्रेदं विलोक्यते यत् नारी स्वकीयाति उच्चगुणवत्तया मनो–वाक–कामसम्पत्या च कमपिपुमांसम् आकर्ष्टुं क्षमा। तदीया कमनीया तन्वी गात्रयेष्टि, मधुरातिमधुरा कोमलकान्त पदावली च कोकीलकाकलीव सदयहृदयानां सहृदयानां हृदयानि कान्तानां जर्हरतीति। एषैव मेनकेव कौशिकं, उर्वशी, पुरुरवसं, सुजातेव साक्षिणं स्वकटाक्ष आक्षेप मात्रेण मनोमुग्धमनोहरमानसराजहंसीव सहजसरलहृदयमानुषमरालं घर्रटमिव भ्रामयति स्वेच्छया, तथा च मन्त्रः – ''समनेव वपुष्यतः कृणवन् मानुषा युगा।। विदे तन्द्रिदश्चेतनमधश्श्रुतो भद्रा इन्द्रस्य रातयः''[16]।। ''एयमगन् पतिकामा जनिकामोऽहमागमम्। अश्व कनिकद् यथा भगेनाहं सहागमं''[17]।। यथा प्रधिर्यथोपधिर्यथा नभ्यं प्रधावधि। यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः। एवा ते अग्न्ये मनोऽधि वत्से निहन्यताम्''[18]।। अयं भावः नारीषु लज्जा–शील–सौन्दर्य–कला–ममता–ज्ञानानि तथा भूतानि भवन्ति यानि जनिजुषां मनांसि विशेषेणाकर्षयन्ति। एतस्य खल्वाकर्षणस्य मूल तासां हार्दिकी विशुद्धिरार्जवं नि''छलत्वं च वरीवर्ति, यद्धि समानगुणशीलवन्तं पुमांसमावर्जयति। तदीये रूपसौन्दर्ये मदीयं मोहकत्वं भवति। एतेनात्मातिचुम्बकीयेन आकर्षणेन सौन्दर्यप्रेमिजनाँस्तथवाकर्षयति यथा सुविकसितानि सुमानि मिलिन्दवृन्दम्। दृष्टेव एतामसौ सहसा एव ब्रवीति – ''अहो लब्धं नेत्रनिर्वाणं''[19]।। उपरि उद्धृते मन्त्रे अनेन भावेन सममिदमपि अभिव्यंजितं यद् बाह्यसौन्दर्य अपेक्षया मनोभित्तिस्थं सौन्दर्यं किमपि विशिष्टं कमनीयं भवति, यद्धि भव्य–विचार–भावावलिभूषितं विशेषेण रारा‍ष्टि। अत एवाह अथर्वागिरसः – नरस्य प्रेमाधिकरणं नारी। सतिस्त्रीयो एको विशिष्टो गुणः, तस्याः पतिर्दीर्घायुर्भवति तदीयं सौभाग्यं च चिरस्थायी भवति। न तत्र क्लिश्नाति वार्धक्यप्रभविष्णुतेति, तथा हि मन्त्रः ''इन्द्राणिमासु नारीषु सुभगामहमश्रवम् नह्यस्या अपरं चन जरसा मरते पतिः विश्वस्मादिन्द्रः उत्तरः''[20]।। अत्र पुरुषस्य बलाबलस्य कारणं नारीति विस्पष्टम्। यदि संयमिनी सा संयमिनं संयुनक्ति तर्हि तयोर्जिवनं दीर्घायुष्ट्वायाव'' यम् उपकल्पते, नो चेत् रुजाक्लिष्टं हतायुष्ट्वा येति ध्रुवम्। नारीणां धार्मिक अधिकाराः कर्त्तव्यानि च।

ऋग्वेदः कल्याणीजाया इत्युक्त्वा नारीन् गृहलक्ष्मी इत्यपि अकथयत्। भाविक बैभवविभाभावितं तद् गृहं संगितस्य मधुरध्वनिभिरध्वनीनवर्गं प्रसह्य कथयति। यतोहि निखिल निजकुल कुलयस्यासौ साम्राज्ञी तस्मात् स्योना स्यात् तस्मै सा सर्वदेति तस्याः कर्त्तवयम्। कुलायिनी पुरंधि कुलपा पभृतिभिः विशेषणैः इममेव आशयं वेदो भूयो भूयः पर्यपूपुषत्। जायदेस्तं इति व्याहृत्य गृहस्य आगर्हान् सर्वान् अधिकारान् तस्यै समार्पिपद्वेदः। वस्त्राभूषणादिभिः विभूषितासौ सर्वागावृता लज्जावती मधुरया भाषया जगजज्जिगीषेत्। कर्मशीला सा सुशीला स्वेन सौशील्येन स्वकुलसाम्राज्यधूरं सहर्षं समुद्वहेत्। वरकन्ययोः परस्परं प्रेम एव उद्वाहाधारः। यथा अभिमतां वृणुते वरो वधं तथैव कन्यापि स्वयं वृण्विताभिष्टं वरम्। अयं तस्याधिकारः। उभयोः उभयं प्रति सम्पूर्णसमर्पणं अन्योन्या अन्वय उन्नयन कारणमितस्था विद्वेषविषं विनाशस्य इति नि'' चप्रचम्। विविधविधान् मतवादान् मतिभेदाँ'' च वदान्यवद् उभौ मिलित्वा समाप्य सुखं लभेताम्।

---

[16]ऋग्.8/62/9
[17]अथर्व.2/30/5
[18]अथर्व.6/70/3
[19]अभिज्ञान. अंक 3
[20]ऋग्.10/86/11

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।। अथर्ववेदेरोगशमनस्य वैज्ञानिकोपायाः ।।

रामनारायण शर्मा
शिक्षा–शास्त्री द्वितीय–वर्ष
(शिक्षा विभाग)
जरारासंविवि जयपुरम्

अथर्ववेदस्य विषये गोपथ व्राह्मणे कथयति " एतद्वै भूयिष्ठं ब्रह्म यद् भृग्वङ्गिरसः। येङ्गिरसः स रसः। येथर्वाणस्तद् भेषजम्। यद् भेषजं तद् अमृतम् । यदमृतं तद् ब्रह्म " इति (गोब्रा34) अर्थात्– ये भृग्वङ्गिरसः नामनी ऋषी तेषामेव श्रेष्ठ वेदः अस्ति। ये अङ्गिरा सः रसः अस्ति। ये अथर्वाः सः औषधः अस्ति। ये औषधः अस्ति सः अमृतमस्ति। यं अमृतमस्ति सैव ब्रह्म अर्थात् अथर्व नाम वेदः अस्ति अथः अथर्ववेदः अस्तीति। एवञ्च अथर्वपरिशिष्टे वर्णनं वर्तते यत् अथर्ववेदस्य मन्त्राणां प्राप्तिर्भविष्यति तर्हि तिथिः, नक्षत्रम्, ग्रहो तथा च चन्द्रशुद्धीत्यादीनां कस्यापि आवश्यकता नास्ति। यत्–

न तिथिर्न च नक्षत्रं न ग्रहो न च चन्द्रमाः।
अथर्वमन्त्रसंप्राप्त्या सर्वसिद्धिर्भविष्यति।।अप24।।

एवञ्च अथर्ववेदे नैकेषु सूक्तेषु रोगाणां शमनाय चर्चा विहिता । अथर्ववेदे आरोग्यार्थं भगवतः सूर्यस्य स्तवनं कृतम्। अत्र अथर्वगायत्री व्याहृतीनाञ्च महत्वं प्रतिपादितम् सूक्तेषु शारीरिकाङ्गानां यादृशं वर्णनं वर्तते तत्तु शारीरिकविज्ञानस्य उत्तमकालस्य प्रज्ञानं ददाति। तत्र हस्तस्पर्शस्य यादृशं महत्वं प्रदत्तं तत् स्पन्दनचिकित्सायाः (एक्युप्रेशरचिकित्सा) महत्वमनुर्णयति। सर्वे जनाः एवमीहन्ति यत् वयं मृत्युञ्जयाः भवेम।

अथर्ववेदे तत् कृते बहुषु विधयः कथिताः सम्मोहनविद्यायाः जन्म अथर्ववेदकाल एवाभवत्। जलेनामपि बहूनां रोगानां समाधानं अथर्ववेदे कृतम्।

यथा–जल चिकित्सा

आपः हृदयरोगाणां शमनं करोति , आपः सर्वेषां रोगान् हरति। आपः विशेषता अस्ति यत् पदार्थस्य आद्रीकरणं कृत्वा शरीरात् बहिष्करणं करोति आपः यत्राऽपि वसति तत्र आर्द्रता भवति। यत्

1कृणोमि ते प्राणापानौ जरां दीर्घमायुः स्वस्ति। अ8211

2 उदायुषा स्वायुषोदोषधीनां रसेन।
व्यहं सर्वेण पाप्मना वि यक्ष्मेणसमायुषा।।अ 33110

एवं प्रकारेण अथर्ववेदे विविधमन्त्रैः विविधरोगाणां शमनार्थं वैज्ञानिकोपायाः सन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याकरणशास्त्रे आचार्यचन्द्रगोमिनः योगदानम्

फूल चन्द चौधरी
शोधच्छात्रः
जरारासंविवि

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम् इत्यनेन परिभाषयानुसारेणयत् शास्त्रेण शब्दानां व्युत्पत्ति अभवत् तत् व्याकरणं कथ्यते । व्याकरणशब्दस्य निष्पत्तिः वि + आङ् उपसर्गाद् पूर्वकं कृ धातोः करणे अर्थे ल्युट् प्रत्ययस्य संयोगेन भवति । साधुत्वशब्दज्ञानाय व्याकरणस्य ज्ञानमनिवार्यः उक्तञ्च भर्तृहरिणा–

साधुत्वज्ञानविषया, सैषा व्याकरणं स्मृतिः।

व्याकरणशास्त्रे अष्टौ आचार्यपरम्पराणां उल्लेखः साम्प्रति प्राप्तवन्तः तद्यथा–

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।

पाणिन्यमर जैनेन्द्रा जयन्त्यष्टादि शाब्दिकाः॥

उपर्युक्तं यत् अष्टौ व्याकरणशास्त्रस्य उल्लेखः तस्यैव द्वितीय चन्द्रः अर्थात् चान्द्रव्याकरणस्य कर्ता आचार्य चन्द्रगोमि अस्ति । अस्यैव आचार्यस्य व्याकरणे क्रियमाणस्य योगदानस्य विवेचनं मम निबन्धस्य निष्कर्षोऽस्ति । वाक्यपदीयस्य रचनाकारस्य भर्तृहरिणः मतेन चान्द्रव्याकरणस्य कर्ता चन्द्राचार्यः अस्ति । उक्तञ्च–

पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः।

स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः॥[21]

एतदतिरिक्तं पुरूषोत्तमदेवः, उज्ज्वलदत्तः, पृथिवीश्वरः, वर्धमान इत्याद्याचार्याणां अनुसारेण चान्द्रव्याकरणस्य रचनाकारः चन्द्रगोमी एव अस्ति । सर्वगुणसम्पन्नः एकः प्रतिभा सम्पन्नः आचार्यः आसीत् । आचार्यचन्द्रगोमी बौद्धधर्मेण सम्बद्धः आसीत् । अस्य विषयस्य प्रमाणस्वरूपं द्वादश प्रमाणानि प्राप्तनि । तेषु प्रमाणेषु प्रमुखानि प्रमाणानि अधोलिखितानि सन्ति । यथा–

1 सिद्धं प्रणम्य सर्वज्ञम् (प्रतिज्ञावचनम्)
2 नमो बुद्धाय नमो मञ्जुशेषाय नमो मृत्युजिते (चाधा)
3 नमो मञ्जुद्घोषाय (चाउसू)
4 निर्वाणो भिक्षुः (चावृ६/३/८६)
5 जिनो भगवान् बुद्धः (चाउसू१/८६)
6 तारा भगवती (चाउसू१/६४)

एतद् प्रमाणेन स्पष्टं भवति यत् आचार्यः चन्द्रगामी बौद्धधर्मस्य आचार्यः आसीत् । आचार्येण चन्द्रगोमिना विरचिते चान्द्रव्याकरणे षडध्यायाः एवञ्च चतुर्विंशति पादाः सन्ति। परञ्च स्वरवैदिकप्रकरणेन सप्त अष्टौ द्वौ अन्या अध्यायौ अपि स्वीचकार ।

चान्द्रव्याकरणस्य मुख्यतया (विशेषता) महत्त्वं अधोलिखितं वर्तन्ते–

1 लाघवम् 2 विस्पष्टता एवञ्च 3 सम्पूर्णता

1 लाघवम्–

एकस्यैव विषयस्य अर्थसम्पादनसमये यदा कदा लाघवस्य, गौरवस्य आश्रयः सम्भवति, अस्मिन् विषये महाभारते श्रीकृष्णद्वैपायनव्यासेन उक्तम्–

विस्तीर्य हि महज्ज्ञानमृषिः संक्षेपतोऽब्रवीत् ।

इष्टं हि विदूषां लोके समासव्यासधारणम् ॥[22]

---

[21]वाक्यपदीय.२/४८३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लाघवं द्विधा भवति शब्दलाघवम् अर्थलाघवञ्च । शब्दलाघवे न्यूनातिन्यूनशब्द–माध्यमेन अभीष्ट अर्थानां सम्पादनं भवति । परञ्च अर्थलाघवेन शब्दानां प्रयोगः अपेक्षाकृतमधिकं भवति। आचार्यचन्द्रगोमिनः व्याकरणशास्त्रे लाघवस्य प्रयोगः षडविंशति प्रकरणे कृतः । तद्यथा–

पाणिनीयव्याकरणस्य तुलना चान्द्रव्याकरणेन सह–

क्र	पाणिनीयव्याकरणे (लाघवः)	चान्द्रव्याकरणे (लाघवः)
1	अकः सवर्णे दीर्घः	अकोऽकि दीर्घः
2	तस्माच्छसो नः पुंसि	शसो नः पुंसि
3	तस्मिन्निति निर्दिष्टे पूर्वस्य	सप्तम्यां पूर्वस्य

चान्द्रव्याकरणं असंज्ञकम् अस्ति । आचार्यचन्द्रगोमिनः स्वव्याकरणशास्त्रे संज्ञासूत्राणां निर्माणं न कृतवन्तः परञ्च संज्ञाशब्दानां विना व्याकरणशास्त्रस्य रचना सम्भवति अतः आचार्येण लोकप्रसिद्धमनेकं संज्ञानां प्रयोगं कृतवान् परञ्च संज्ञार्थ सूत्रनिर्माणं न कृतवान् ।

2 विस्पष्टता–

सूत्रलक्षणे सर्वप्रथमं उक्तं अल्पाक्षरत्वं परञ्च सूत्रं सर्वदा अल्पाक्षरत्वे सति सन्दिग्धरहितं सारवदेव भवितव्यम् । सारवदेव अर्थो हि शब्दस्य प्राणभूतः विस्पष्टता तु अर्थस्य जीवनः अस्ति। महाकविभारविना वाग्मी जनः उक्तः चतुर्धा वाग् विभक्ता । उक्तञ्च–

स्फुटता च पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरो न च सामर्थ्यमपोहितं क्वचित् ॥

एतदेव स्पष्टं स्फुटता, अर्थगौरवं पृथगर्थता एवञ्च सामर्थ्ययोगा च गिरां सुशोभितं एतद् कारणादेव आचार्यचन्द्रगोमिनः मंगलाचरणे क्रियमाणप्रतिज्ञानुसारेण विस्पष्टतार्थकविधायकं सूत्राणां रचनायाः प्रयासः कृतवन्तः। विस्पष्टता कारणादेव चन्द्रगोमिनः पाणिनेः सूत्राणामपेक्षा यत् परिवर्तनं कृतवान् ।

महर्षि पाणिनिना प्रतिपादितानां शब्दानां विस्पष्टार्थकमाध्यमेन सम्पादितः किञ्चित् प्रधानानां वा सरससरलशब्दानां प्रयोगः अधोलिखितः वर्तन्ते ।

क्र	पाणिनीय	आचार्यचन्द्रगोमिनः
1	प्रत्यवसाने (३/४/७२)	आहार (१/२/७१)
2	निगरणम् (१/३/८७)	आहार (१/४/३६)
3	उपसर्जनम् (४/१/५४)	अप्रधानम् (२/३/६१)
4	गन्धनम् (१/२/१५)	सूचना (५/३/४७)

3 सम्पूर्णता–

चान्द्रव्याकरणस्य त्रिविधविशेषतानां अन्तिमो यो सः सम्पूर्णता अस्ति । आचार्यचन्द्रगोमी बौद्धधर्मस्यास्ति यो दर्शनशास्त्रानुसारेण नास्तिकदर्शनमस्ति । परञ्च आचार्यः स्व व्याकरणशास्त्रे स्वरवैदिकशब्दानां अथवा लौकिकमलौकिकं शब्दानां प्रयोगः कृतवान् । अतः स्पष्टमभवत् चान्द्रव्याकरणं सर्वविधशब्दानां साधुत्वज्ञानाय सम्पूर्णतां याति।

---

[22]महाभारत.१/१/५३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यज्ञो वै श्रेष्ठतमं कर्म

डॉ प्रशान्त शर्मा

आधुनिककाले जनाः यज्ञकर्मणो विमुखाः दृश्यन्ते, अज्ञानवशाच्च यज्ञेन न कोऽपि लाभः इति मुहुर्मुहुः जल्पन्ति। वस्तुतः यज्ञस्य आध्यात्मिकदृष्ट्या लाभस्तु सर्वजनविदित एव यथा–**यज्ञो वै श्रेष्ठतमं कर्म, यज्ञो वै विष्णुः, विष्णुर्वै यज्ञः, स्वर्गकामो यजेत्, अग्निष्टोमेन यजेत स्वर्गकामः** इत्यादिवचांसि यज्ञस्य आध्यात्मिकं महत्वं प्रतिपादयन्ति। निष्कामकर्मणः सर्वप्रथममुदाहरणं वर्तते यज्ञः। परमात्मनः प्राप्तेः कृते समर्पणभावनां तेन त्यक्तेन भुञ्जीथाः सूचयत्ययं यज्ञः। ईश्वरविरचितमिदं जगत्, तस्य स्मृतिं कारयत्ययं यज्ञः। इत्थम् आध्यात्मिकष्ट्या बहवो लाभाः सन्ति यज्ञस्य।

वैज्ञानिकदृष्ट्याऽपि यज्ञस्य लाभ इतो प्यधिको वर्तते। यस्मिञ्जगति वयं जीवामः तत् परितः स्थितमावरणं पर्यावरणं कथ्यते। पर्यावरणाय यज्ञस्य सर्वाधिका उपयोगिता भवति। वायुमण्डले ऑक्सीजेन तथा कार्बन डाइऑक्सइड इति वाय्वोः सन्तुलनं यज्ञमाध्यमेन संस्थाप्यते इति बहुविधपरीक्षणैः वैज्ञानिकाः साधितवन्तः। एताः प्राकृतिकाः विसङ्गतीः दूरीकर्तुमस्माकं प्राचीनर्षयः पृथ्वीअन्तरिक्षद्युलोकस्थितं पर्यावरणं सन्तुलयितुं प्राकृतिकशक्तीनां गहनमध्ययनं कृत्वा देवतारूपेण ताः स्वीकृतवन्तः। एताः देवरूपशक्तीः यथावत् स्वानुकूला निर्मातुम् ऋषयः नानाकर्मभिः तासाम् आराधनां कृतवन्तः। तेष्वेव कर्मसु यज्ञोऽपि श्रेष्ठतमकर्मरूपेण मन्यते। पर्यावरणशुद्धेः अभिन्नङ्गत्वेन ऋषयः मानवस्य दिनचर्यायां यज्ञकर्मणः अनिवार्यत्वं प्रतिपादितवन्तः।

अयं यज्ञः वेदे भुवनस्य नाभिरूपेण कथितः अयं यज्ञो भुवनस्य नाभिः। ब्रह्माण्डस्य केन्द्रबिन्दुः उद्गमस्थलं यज्ञो वर्तते । शतपथब्राह्मणानुसारम् ऋतशब्दः यज्ञस्य पर्यायो वर्तते। अस्मिन्नेव ऋते सम्पूर्णञ्जगद् नियन्त्रितं भवति। गीतायां ब्रह्मरूपेण चेद् ब्राह्मणग्रन्थे सार्वभौमसत्तारूपेण अयं यज्ञः स्वीक्रियते। सम्पूर्णजगतः सत्ता अस्मिन्यज्ञे निहिता, सृष्टेः अन्ते अयमेव अवशिष्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मयूखकारमते श्राद्धलक्षणम्

पुनित शर्मा
शोधच्छात्र
जरारासंविवि, जयपुर

मयूखकारेण लक्षणाध्याये श्राद्धस्वरूपं सुस्पष्टीकृतं कथितं च मृतोद्देश्यकोविप्रस्वीकारांकोद्रव्यत्यागः श्राद्धम्। द्रव्यत्यागादेवद्रव्यदेवतासंयोगेनेन्द्रोध्वोध्वरः।

नममइत्युच्चारणमाचारात्सर्वे। ग्रन्थकारः एनं प्रलापं एव कथयति आचरणाभावात्। त्यागस्तु मनसा एव भवति। नीलकण्ठः विप्रस्वीकाराकत्वं आवश्यकं मन्यते। केचन्पिण्डदानम् अग्नौकरणमपिप्राधान्यं सिद्धिः मन्यते। आपस्तम्बसूत्रे पितरोदेवताब्राह्मणस्तुआहवनीयार्थः। ब्रह्माण्डपुराणस्य उदाहरणश्लोके-पितृनुद्दिश्यविप्रेभ्योदत्तं श्राद्धमुदाहृतम् तदापित्रुद्देश्यकान्नत्यागरूपत्वात्विप्रभोज–पिण्डदानयोः एवप्राधान्यम्।

ग्रन्थकारः कथयतियत्संक्रात्त्यादिश्राद्धेषु कदाचित्पिण्डदानं प्राच्यैः निषिद्धं वृद्धयादिश्राद्धेषु पिण्डदानोऽपिन भवति। तस्माद्श्राद्धे पिण्डदानं गौणताममिहितंगौणतां भवति। विप्रस्वीकारकाको द्रव्यत्याग एव श्राद्धे प्राधान्यम्। अत्र कर्कानुयायिनां मतमपि उल्लिखितम्कृतम्। पिण्डदानमेवप्रधानंनान्नत्यागः परञ्चनीलकण्ठभट्टः विप्रस्वीकारकत्वं द्रव्यत्यागः एवंप्रधानश्राद्धलक्षणं मन्यते।

अतएव मयूखकारः श्राद्धलक्षेण विप्रभोजनं वा विप्रस्वीकारत्वेन द्रव्यत्यागस्य एवं प्राधान्यं मन्यते। यथा आमन्नश्राद्धं, हेमश्राद्धं अपिविप्रस्वीकारकत्वेन एव भवति। अपिचेत्दर्भबटवोऽपिश्राद्धस्थाने संस्थाप्य विप्रभोजनं आवश्यकं भवति, तेषांमते दर्भबटवोऽपि विप्राणां प्रतिनिध्यत्वमावहन्ति। यदि विश्वेदेवानां आवाहनेचत्रिदैवत्यं, षट्देवत्यं, नेवदैवत्यं, द्वादशदैवत्यं वा प्रत्यक्षनिमंत्रणपूर्वकविप्रान्संस्थाप्य श्राद्धं कुर्वन्ति तर्हि विप्रस्वीकारांको द्रवत्यागस्तु सर्वथा समीचीनः एव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काव्यप्राणमयमौचित्यम्

पुष्पा कुमारी झांझडिया
शोधच्छात्रा
साहित्य–विभाग
जरारासंविवि, जयपुर

आचार्यक्षेमेन्द्रेण विविधसाहित्यिकविधासु चत्वारिंशदधिकग्रन्थाः विरचिताः। तेषु काव्यालंकारविवेचनायुतो ग्रन्थः कविकर्णिकेति रचितः। तथा काव्यदोषादिसम्बद्धः काव्यालंकारनामकः ग्रन्थः विरचितः। एतेषां ग्रन्थानां रचनानन्तरमाचार्यक्षेमेन्द्रस्य मनसि विचारागतः गुणालंकारदोषादीनां सम्यग् विवेचनं औचित्यनामकेन तत्त्वेनैव सम्भवति, यच्च चमत्कारमयमास्वाद्यं चारुचर्वणायुतं काव्यस्य जीवितभूतमेव। यदि रसः काव्यस्यात्मा वर्तते, तर्हि रसस्य आत्मा औचित्यमेव–

औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।
रसजीवितभूतस्य विचारं क्रियतेऽधुना ॥

काव्ये औचित्यानुरूपविधानमावश्यकम्, अन्यथा गुणालंकारादिभिः सुशोभिते सति तत् निरर्थकं मिथ्यापरमेव भविष्यति । यथा–

काव्यस्यालमलंकारैः किं मिथ्यागणितैर्गुणैः।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते ॥

गुणालंकारेष्वपि तावत् सुन्दरता अभिव्यञ्जिता न भवति, यावद् औचित्यस्य तात्त्विकसञ्चारो न भवति। यथा स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नरा इति कथाश्रुतिरपि पोषयति यदौचित्योल्लंघनं न शोभादायकमिति।

वस्तुतः निष्कर्षरुपेण वक्तुं शक्यते यत् काव्यप्राणमयमौचित्यं विना काव्यसर्जनं निष्प्राणा निष्क्रिया च। यथोक्तम्–

अलंकारस्त्वलंकारा गुण एव गुणाः सदा ।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ॥

उक्त कथनं आचार्यभरतः, आचार्यभामहः, रुद्रटः, भट्टलोल्लटः, आनन्दवर्धनादयः सुविख्यातसाहित्यकाराः स्वीकृतम् तथा विषयेऽस्मिन् स्व स्व मतमप्युपस्थापितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋतुचर्यायाः अस्माकं जीवने प्रभावः

रघुशर्मा
विद्यानिधिः,
जरारासंविवि, जयपुरम्

आयुर्वेदे स्वस्थस्य स्वास्थ्यरक्षार्थं ये उपायाः उक्ताः तेषु अन्यतमोऽयम् उपायः ऋतुचर्या ।एवं गण्यन्ते–

मासैर्दिवसङ्ख्यैर्माघाद्यैः क्रमात् षड्तवः स्मृताः।
शिशिरोऽथ वसन्तश्च ग्रीष्मवर्षाशरद्धिमाः ।।

तत्र षष्ठिनिमेषाणाम् एका घण्टा । चतुर्विंशतिघण्टानाम् एकं दिनम् । एकस्मिन् दिने दिवा रात्रिः इति द्वौ भागौ स्तः । सप्त दिनानां सप्ताहः इत्युच्यते । पञ्चदश दिनानाम् एकः पक्षः । द्वयोः पक्षयोः एकः मासः । द्वादश मासानाम् एकः संवत्सरः । द्वयोः मासयोः एका ऋतुः तस्मात् ऋतवः षट् ।

प्रत्येकम् ऋतौ आचरणं भिद्यते, तदेवम् –

हेमन्ते जठराग्निर्बलवान्। स चाधिकमन्नरूपमिन्धनमपेक्षते। अतोऽस्मिन् ऋतौ मधुराम्ललवणरसात्मकानि भोज्यान्यधिकं भोक्तव्यानि। अन्यथा इन्धनाभावादग्निर्धातून्पचति, बलहानिं च जनयति।हेमन्ते निशा दीर्घा। तेन प्रातरेव नरा बुभुक्षवो भवन्ति। अतः प्रातरेव नरैः क्षुधा शमनीया ।रौक्ष्यमधिकमतोऽभ्यङ्गो विशेषतः कार्यः। शैत्याधिक्यमस्त्यतः उष्णजलेनैव स्नान–माचरितव्यम् । अगरु–वचा–हरिद्रासदृशैरुष्णद्रव्यैः शरीरस्योद्वर्तनं कार्यम् । बलमुत्तममस्ति, अतो व्यायामः शक्त्यनुसारमाचरणीयः। शिशिरे हेमन्ततोऽपि शैत्यमधिकं, रौक्ष्यं चाप्यधिकम् । अत एते एव आहाराः विहाराश्च विशेषतः सेव्याः।हेमन्तचर्याया एवातिदेशोऽत्र क्रियते।हेमन्तशिशिरयोः शैत्येन कफसञ्चयो भवति। वसन्ते प्रखरसूर्यतापेन तस्य कफस्य द्रवीभावो जायते। तस्माद्वसन्तारम्भ एव वामकैरौषधैर्वमनं शस्यते। तेन द्रवीभूतः कफः बहिर्निरेति। मस्तकादारभ्य कण्ठं यावत् कफो विशेषेण तिष्ठतयतःकफघ्न–नस्यैश्च तत्रत्यकफस्य निराकरणं कार्यम् । कफप्राबल्यादग्निर्मन्दो भवति। अत आहारो लघुर्भवितुमर्हति। कफविलयनायाग्निबलविवर्धनाय च व्यायामोऽनिवार्यः। रूक्षमुद्वर्तनमङ्गमर्दनं चाप्यनुष्ठेयम्। पानार्थं शुण्ठीसिद्धं खदिरसिद्धं मुस्तासिद्धं वा जलमुपयोक्तव्यम्। मधुसंयुतं जलमपि वसन्ते शस्यते। ग्रीष्मचर्यायां सूर्यातपश्चण्डतरो भवत्यस्मिनृतौ, अतोऽम्ल–लवण–कटुरसा अत्र वर्जनीयाः, आग्नेयत्वात्।मधुरप्रायं लघु, स्निग्धं च भोजनं भवेत् । पानार्थं नवे मृत्कुम्भे स्थापितं जलं प्रशस्तम्। सकर्पूरं सुशीतलं सुगन्धयुतं पानकं मध्यन्दिने पेयम् ।निशि च चन्द्रकिरणैः शीतं ससितं माहिषं क्षीरं पेयम्। गात्रे चन्दनलेपो भवेत्। सूक्ष्मं तनु च वासो धार्यम् । व्यायामो न्यूनतरः स्यात् । वर्षासु नराणां शरीराणि त्रिभिरपि दोषैर्दुष्यन्ति। तत्रापि वातः प्रकुप्यतितराम्। अग्निर्नितरां मान्द्यमुपैति। तस्मादन्नद्रव्याणि प्रभूतसावधानचेतसा भक्ष्याणि। तेन सहैवाग्निदीपनानि पाचनानि द्रव्याणि च सेव्यानि। एकस्माद्वर्षात्पूर्वं जातं धान्यमस्मिनृतौ हिताय भवति। द्विदलेषु मुद्गाः सुखजीर्याः, तसमाद्भक्ष्याः। अन्नस्य रुचिप्रदानकर्मणि सलवणं पञ्चकोलमिश्रितं हि तक्रं प्रशस्यते। वर्षादौ नरशरीराणि वामकरेचकौषधक्षमानि च सञ्जायन्ते। तस्मात्तेषामुपयोगः कार्यः। बृहदान्त्रस्य स्वच्छीकरणाय बस्तिस्वीकरणं भवति। तेन सार्वदेहिकवातस्यापि शोधनं जायते। पानार्थे सुतप्तमम्बु सुखाय भवति। स्नानार्थे शौचार्थे च नित्यमे–वोष्णं जलम् उपयोज्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दर्शनशास्त्रदृष्ट्या सृष्टिविज्ञानम्

डॉरामेश्वर नाथ द्विवेदी
सहायकाचार्य (दर्शनविभाग)
जरारासंविवि

सृष्टिपदमत्र सृज् धातोः कर्मणि क्तिन् प्रत्यये सति दृश्यप्रपञ्चपरम्। प्रकर्षेण प्रथमतो वा क्रिया प्रक्रिया। सर्वप्रथममुपनिषत्सु वर्णितःसृष्टिक्रमः प्रदर्श्यते। स एव क्रमोऽत्र दर्शनेऽपि प्राधान्येन समादृतोऽस्ति।

उपनिषत्सु अनेकधा सृष्टिप्रक्रिया वर्णितः। तथा हि तस्माद् एतस्माद् आत्मनि आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या अन्नौषधयः इत्याकाशादिका सृष्टिः। प्रलये बहुकालातिक्रमोत्तर प्राणिनां मायानिलीनादृष्टपरिपाकाद् मायावृत्तिरूपे क्षणसम्पन्नादात्मनः आकाशः सम्भूतः।

लयः प्रधानविक्षेपशक्तिमद् अज्ञानोपहितचैतन्यादाकाशादि सृष्टिः उत्पद्यते। सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण आकाशादि उत्पद्यन्ते । अर्थात् कारणस्याव्याकृतस्य चे गुणाः सत्त्वादयः तेषां प्रक्रमेण तान् गुणानारभ्य यथाकार्य क्रमं सत्त्वादिगुणाः सहैव कार्यः तेषु उत्पद्यन्त इत्यर्थः।

अद्वैतवेदान्ते आत्मनो नित्यत्वेनैकरूपस्य परिणामासम्भवात्। किन्तु अत्र अज्ञानोपाधिरूपत्वात् जगतः विवर्तरूपेण सम्भवति। सर्वप्रथमं सूक्ष्मशरीराणि सप्तदशावयवानि लिंगशरीराणि जायन्ते। अवयवास्तु द्रियपञ्चकं, बुद्धि, मनसी, कर्मेन्द्रियपञ्चकं, वायुपञ्चकं चेति। ज्ञानेन्द्रियाणि आकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि आकाशादीनां रजोऽशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। स्थूलमतानि तु पञ्चीकृतानि। तमोगुणयुतेभ्यः पञ्चीकृतभूतेभ्यः चतुर्दशभुवनात्मकब्रह्माण्डस्य जरायुजादि चतुर्विधस्थूलशरीराणां चोत्पत्तिः।

न्यायवैशेषिकमतानुसारेण प्रलयकाले धर्माधर्मसंस्कारानुविद्धान् जीवात्मनः मोक्षमलममानान् दृष्ट्वैष भगवान् करूणापरवशः धर्माधर्मसंस्कारक्षायार्थं सुखदुःखपरिपूर्ण जगदिदं सृजति। जगतसृजनस्य प्रयोजनम् गौणमस्ति भोगः जीवात्मानाम्। वैशेषिकमते अयं ईश्वरः जगतः स्रष्टा निमित्तकारणमस्ति। जगतोऽस्य परमाणवः समवायिकारणभूताः, परमाणूनां संयोगोऽसमवायिकारणम्, ईश्वरश्चास्य जगतः निमित्तम् अयमधिष्ठाता परमाणूनाम् अन्यथा सर्ग एव न स्यात्। अचेतनानां चेतनमधिष्ठातारमन्तरेण प्रवृत्तेरसम्भवात्।

सांख्यदर्शनानुसारं सृष्टेः प्रयोजनं पुरूषस्य कृते भोगापवर्गयोः संसिद्धिः एव। अतः भोगापवर्गौ एतौ परमपुरूषार्थौ स्तः। साख्यमते सर्वप्रथमं प्रधानाद् महत् तत्त्वमुपजायते, तदनन्तरं महत्तत्त्वमपि अहंकारमुत्पादयति एवं च अहंकाराद् पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चतन्मत्राः, मनश्च षोडशगणाः उत्पद्यन्ते। तदेव सम्भूय षोडशतत्त्वानां समूहः जातः। ततश्च पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानाम् उत्पत्तिः जायते। सांख्यशास्त्रे एवमेव सृष्टिप्रक्रिया सम्भवति।यथा

प्रकृतेः महांस्ततोऽहंकारः तस्माद् गणश्च षोडशकः।

तस्मादपि षोढशकात् पञ्चभ्यः पञ्चभूतानि॥ सांकारिका२२

वाक्यपदीयविधात्रा श्रीहरिणाऽपि अनादिनिधनं व्यापकं चिद्रूपं वेदान्तवेद्यं यद् ब्रह्म तदेव **वाग्वै ब्रह्म** इत्यादि श्रुतबलेन शब्दरूपतयाऽभ्युपेत्य तत्र जगतो विवर्तोपाद्यनत्वमेवा विद्याशक्तिसहकृतकालशक्तेश्च सस्कारित्वं सिद्धान्तितम्। तथा चोक्तम्

अनादि निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

श्री नागोजिभट्टेन उक्तं यत् प्रलये नियतकालपरिपाकां सर्वप्राणिकर्मणामुपभोगेन प्रक्षये सर्वं जगद् मायायां लीयते। सा च चेतनेश्वरे लीयते। ततोऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषौ प्रादुर्भवतः। ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते। ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते। इदमेव शक्तितत्त्वम्। एवं प्रकारेण संक्षेपेण दर्शनशास्त्रेषु सृष्टिविषयकं मतमस्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महर्षिपाणिनिशास्त्रव्याकरणाध्ययनफलम्
(आलेखसारांशः)

डॉ प्रमोदकुमारशर्मा,
व्याकरणविभागाध्यक्षचरः
सहाचार्यो व्याकरणविभागे,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालये, जयपुरे

"आलेखेऽस्मिन् पाणिनिव्याकरणशास्त्रस्य फलविषयकचिन्तनं लिखितमस्ति। महर्षिपाणिनिशास्त्राध्ययनेन न केवलं संस्कृतभाषाज्ञानमपितु शास्त्रपूर्वकशब्द प्रयोगादभ्युदयनिश्श्रेयससिद्धिरपि भवति। यद्यपि पाणिनीयव्याकरणाध्ययनस्य बहूनि प्रयोजनानि महाभाष्यकारेण पतञ्जलिना पस्पशाह्निके महाभाष्ये प्रोक्तानि तथापि वाक्यपदीयादिदार्शनिकग्रन्थेषु शब्दब्रह्मणः स्वरूपं तथा तत्प्राप्तिरूपमोक्षप्राप्तिः प्युपदर्शिताऽस्ति। व्याकरणज्ञानाद् शब्दसाधुत्वासाधुत्वबोधोत्पत्तिरूपफलं तु लौकिकमस्ति किन्तु परमपुरुषार्थमोक्षफलप्राप्तिरपि पाणिनीयव्याकरणज्ञानाद् भवतीति सप्रमाणमत्रालेखे संसाधितमस्ति।"

पाणिनिशास्त्राध्ययनफलकथनावसरे इत्थमेव प्रतिपाद्यते यत् महाभाष्यप्रतिपादितमुख्यानुषङ्गिकप्रयोजनरूपफलेभ्योऽतिरिक्तं व्याकरणशास्त्रस्य साधुत्वासाधुत्वान्वाख्यान प्रथमं प्रत्यक्षम्फलं दृश्यते। अतः एव महावैयाकरणभर्तृहरिणा वाक्यपदीये निगदितं यत् शब्दस्य द्वे रुपे स्तः शब्दत्वं साधुत्वं च। तत्राद्यस्य श्रोत्रेन्द्रियग्राह्यत्वेऽपि द्वितीयं व्याकरणादेव गृह्यते न तु श्रोत्रात्, अन्यथा अनधीतव्याकरणकोऽपि प्रतिपद्येत। एकस्मिन्नेव गोरुपेऽर्थे गोत्वजातिनिमित्तेन गोणीशब्दोऽसाधुः, आवपन सादृश्यात् प्रयुक्तः साधुः, इत्येवम्भूतशब्दार्थसम्बन्धस्य निमित्तं प्रवृत्तिनिमित्तं तस्य अविपरीतं तत्त्वम् साध्वसाधून्, एवम् अयं शिष्टः साधुशब्दप्रयोक्तृत्वात्, इत्येवमनुमितान् शब्दान् तान् विशिष्टांश्च अवैयाकरण कथं ज्ञातुं समर्थो भविष्यति।

प्रतिपदोक्तशब्दपारायणस्तु, अत्यन्तकृच्छो मार्गः इति भगवता पतञ्जलिना प्रथमाह्निके महाभाष्ये निगदितम्। साधुशब्दान्वाख्यानञ्च पुण्यजनकमिति प्रोक्तं महाभाष्ये पतञ्जलिना।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतवाङ्मये वैज्ञानिकचिन्तनपरम्परा

सुरेन्द्र सिंह बैरवा
प्रशिक्षितस्नात्तकशिक्षकः (संस्कृतम्)

संस्कृतस्य स्वरूपम्–

किं नाम संस्कृतमिति जिज्ञासितं चेत् परिष्कृतं, परिशुद्धं, व्याकरणादिदोषरहितं यत् तत् संस्कृतम्। प्राचीनैः ऋषिभिर्मुनिभिश्च भाषागतदोष–परिष्कारेण,अपशब्दादिदोषवारणेन या परिष्कृता भाषा व्यवहृतिमानीता सैव संस्कृत–भाषा–नाम्ना सम्बोध्यते, प्रशस्यते,आद्रियते च। 'विद्वांसो हि देवाः' विद्वज्जनव्यवहृता चेयं भाषा।

संस्कृतस्य विपुलं साहित्यम्–

भारतवर्षस्य समस्तमपि प्राचीनं वाङ्मयं संस्कृत–भाषामिश्रत्यैवावतिष्ठते। निखिलवैदिकं वाङ्मयं, ग्रन्थाः,दर्शनानि,काव्यानि,आख्यानसाहित्यम्,नीतिग्रन्थादयश्च संस्कृतभाषायामेवोपलभ्यन्ते।नकेवलमतदेव,व्याकरणं,काव्यशास्त्रं,गणितं,ज्योतिषम्,आचारशास्त्रं,काव्यशास्त्रम्,आयुर्वेदः,धनुर्वेदः,वास्तुकलाशास्त्रं,अर्थशास्त्रं,राजनीतिशास्त्रं,ऐतिह्यम्,छनदःशास्त्रं,कोषग्रन्थाश्च संस्कृतभाषाया गौरवमभिवर्धयन्ते। ज्ञानस्य विज्ञानस्य न तादृशं किमप्यङ्गम्,यन्नैवौपलभ्यते संस्कृतभाषायाम्।

संस्कृतस्य भाषाशास्त्रीयं महत्त्वम्–

भारोपीयपरिवारे संस्कृतभाषैव प्राचीनतमा। तन्मूलकमेव भाषाविज्ञानस्य उद्भवः। संस्कृतभाषायामुपलब्धं वाङ्मयं भाषाशास्त्रीयां सर्वामप्यावश्यकतां पूरयति। संस्कृतभाषामूलकमेव तुलनात्मकदेवशास्त्रस्योत्पत्तिः। संस्कृतभाषाश्रयेण सर्वा अपि भारतीय भाषाः सारल्येनावगन्तुं पार्यन्ते। यतो हि तत्र प्रतिशतं षष्टि–प्रतिशतादारभ्य अशीतिप्रतिशतं यावत् संस्कृतशब्दाः प्रयुज्यन्ते। जर्मन–फ्रेन्च–आङ्ग्लभाषादिष्वपि महती संख्या संस्कृतस्य तत्सम–तद्भव शब्दानाम्। एवं विज्ञायते यत् भाषाविज्ञान–दृष्ट्या संस्कृतभाषा बहुमूल्यो निधिः।

संस्कृतवाङ्मयः तद्भेदाश्च–

विद्वांसः संस्कृतं द्विविधं विभज्यते । वैदिकसंस्कृतं लौकिकसंस्कृतम् चेति । पाणिन्यादिमुनित्रयनिबद्धं संस्कृतं लौकिकसंस्कृतम्। परन्तु संस्कृतं त्रिविधं भवितुम् शक्यते वैदिकसंस्कृतम्, आर्षसंस्कृतम्, लौकिकसंस्कृतम्। वेदेशु उपनिषत्सु या भाषाप्रयुक्ता सा वैदिकसंस्कृतभाषा। अथ च पाणिन्यादि त्रिमुनिभिः पूर्वं प्रयुक्ता रामायणमहाभारतपुराणादिषु प्रयुक्ता भाषा आर्षभाषा अस्ति अत्र अपाणिनीयाः प्रयोगाः दृ यन्ते ते एव आर्षप्रयोगाः कथ्यन्ते। लौकिकसंस्कृते पाणिन्यादि त्रिमुनिभिः सिद्धानि पदानि प्रयुक्तानि भवन्ति।

संस्कृतवाङ्मये गणितशास्त्रं –

आर्यभटः 499 खोष्टाब्दे पाटिलपुत्रे 'आर्यभटीयम्' लिखितवान्। अस्मिन् ग्रन्थे ज्यामितिप्रकरणे बहुविधवृत्तविशेषाः π मितिः (31416), प्रतिलेखीयज्यामितिः च व्याख्याताः। त्रिकोणमितिरपि वदासम्भवितासीत्। बीजगणिते चतुरक्षरसमीकरणस्य विधिः आर्यभटीयस्य गणितपादे प्रवर्तते।

संस्कृतवाङ्मये आयुर्वेदः –

बहुविधाओषधयः वेदेषुसमाज्ञाता बभूवुः यथा–

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।
बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः।। ऋग्वेद 109795

संस्कृतवाङ्मये रसायनविज्ञानम् –

अग्निचूर्णस्य प्रथमोल्लेखः स्पष्टरूपेण वाल्मीके रामायणे वर्तते। तद्यथा–

अग्निचूर्णमिवाविद्धं भास्वराम्बुमहोरगम्।सुरारिविषयं घोरं पातालविषमं सदा।। युद्धकाण्डे 4119

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतवाङ्मये भौतिकविज्ञानम्–

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।विश्वमाभासि रोचनम् ।।

संस्कृतवाङ्मये वनस्पतिविज्ञानम्–

ऋग्वेदानुसारमोषधीनां वैदिकयुगे पर्यालोचनाय वैद्या अवसरं प्राप्तवन्तः। यतः

यत्रोषधीः समग्मत राजानः समिताविव।

विप्रः स उच्यते भिषग् रक्षोहामीवचातनः।। ऋग्वेदे 10976

संस्कृतवाङ्मये प्राणीशास्त्रम् –

सूक्ष्मप्राणिनामस्तित्वं स्पष्टरूपेण महाभारते निर्धारितम्। तथा हि–

सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कनिचित्।

पक्ष्मणोऽपि निपातेन तेषां स्यात् स्कन्धपर्ययः।। शान्ति0 1526

ऋग्वेदानुसारं यन्त्रप्रयोगस्य प्रचलनमासीत्। तद्यथा–

सविता यन्त्रैः पृथिवीमरम्णात् ।101491

संस्कृतवाङ्मये विमानविज्ञानम् –

विमानरचना–विधिः समराङ्गणसूत्रे वर्तते। भारद्वाजेन रचिते वैमानिकशास्त्रे विमानरचना–रीतिवर्तते।

संस्कृतवाङ्मये कृषिविज्ञानम् –

पक्षयोः शोषणं रौद्रे खगानामम्बहुचारिणाम्।

झिन्झीरवतस्थाकाशे सद्यो हि वर्षलक्षणम्।। कृषिपराशरः–70

संस्कृतवाङ्मये परमाणुविज्ञानम् –

जालान्तरगते भानोःसूक्ष्मं यत् दृ यते रजः।

तस्य षष्ठतमो भागः परमाणुः सःउच्यते।।

संस्कृतवाङ्मये संगीतविज्ञानम् –संस्कृतवाङ्मये धातुशास्त्रम् –संस्कृतवाङ्मये यंत्रविज्ञानम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"संस्कृतसाहित्ये ज्योतिषशास्त्रीयतत्वानि"

सिद्धार्थ उपाध्यायः
(आचार्य प्रथमवर्षम्)
राष्ट्रियसंस्कृतसंस्थानम् (केविवि)
(मानितविश्वविद्यालयः)
जयपुरपरिसरः

वेदांगेषु शिखरायितो नेत्रायितश्च ज्योतिर्वाङ्मयविशिष्टः प्रायः सर्वेष्वेव परवर्तिग्रन्थेषु न्यूनाधिकरूपेण प्रतियादितो विद्यते। साहित्यशास्त्रीपकाव्यग्रन्थेष्वपि ज्योतिषशास्त्रस्य नेकविषयाः प्रतिपादिताः सन्ति। प्रायः समेऽपि प्राचीनयरम्परायाः साहित्यकाराः काव्यकारा ग्रन्यकाराश्च स्वीयेषु काव्यनाटकचम्पूगद्यपद्यरचनासु ज्योतिषशास्त्रीयतत्वानि स्वीयोद्देश्यपूर्तये साहाय्सत्वेनांगीकृतवन्तः। नायक– नायिकानां शरीरांगलक्षणविमर्शणावसरे सामुद्रिकशास्त्ररीत्या विवेचन तेषां व्यक्तित्वानां विवेचनं सहजतयेव सह्रदयानां मनांस्याकर्षयति। प्रकृतिनटिविवेचनावसरे सरलतयैव संहिताज्योतिषोक्तविषया प्राकृतिकलक्षणविभ्मर्शाश्च प्रकटिता भवन्ति। घटनाविशिष्टावसरे कार्यविशेषाचरणकाले वा समुचितनक्षत्रग्रहमुहूर्त्तकालानामुल्लेखाः साहित्याचार्याणां ज्योतिर्ज्ञानगौखमनायासेनेव प्रतिष्ठाययन्ति। महाकविमाघस्य शिशुपालवधो भवतु अथवा कालिदासस्य काव्यग्रन्था भवन्तु अथवा कादम्बरी भवतु प्रायः सर्वयैव ज्योतिषशास्त्रीया सामुद्रिक–प्राकृतिक–मौहूर्तिक–सांस्कारिक'ग्रहनक्षत्रग्रहणोल्कातपनेन्द्रधनुषदिग्दाहादयो नैकविषयाः साहित्याचायैः प्रतियादिताः सन्ति। महाभारते त्रयोदशदिनानां पक्षस्य ग्रहणफलस्य पशुपक्षिचेष्टाफलस्य विवेचनं तु प्रसिद्धमेवास्ति। शुकन्तला दुष्यन्त–भरतेन्दुमती–मालविकादिविशिष्टपात्राणां सामुद्रिकारीत्या विवेचनं तु साहित्यकाराणां निधिरेखास्ति। मदीये शोधालेखे विषयेऽस्मिन् इतोऽपि ग्रन्थोद्धरण पुरस्सरं लोकोपकारकं सह्रदयह्रदयावर्जकं च विवेचनं भविष्यतीति शम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौतम धर्मसूत्रे नारी

कैलाश चन्द्र बुनकर
शोधार्थी
वेद विभाग (धर्मशास्त्र)
जरारासंविवि,
मदाऊ,जयपुर

''अस्वतन्त्रा धर्मे स्त्री'' 1291 पत्यनुसरणं स्त्रीधर्मो वर्तते, सा धर्मे स्वतन्त्रा नास्ति । धर्मसूत्रे नार्याः धर्मस्य मूलमन्त्रं इदमेव सूत्रं वर्तते। स्त्री पत्यौ आश्रिता स्यात्, तस्यानुसरणं च कुर्यात्। अस्मिन् कथने धर्मसूत्राणि कामपि नवीनतां न प्रस्तुवन्ति। गृहकर्मसु धार्मिकक्रियासु च सा गृहिणी , सहधार्मिणी इत्यादिरूपेण गौरवपूर्णपदे प्रतिष्ठिता अस्ति। परन्तु तस्या एतस्य विषये स्थानस्य प्रश्नः अस्ति। तस्या जीवनस्य लक्ष्यं वर्तते, पुत्रस्य सन्ततेर्वा उत्पत्तिः। पुत्रस्य सुयोग्यपुत्रस्य च कामना तस्य अनिवार्यतां च धर्मशास्त्रेषु केवलं लौकिकदृष्ट्यां एव न अपितु पारलौकिकदृष्ट्याऽपि पुत्रप्राप्तिः गृहस्थाश्रमस्य लक्ष्यम् उक्तमस्ति। सुयोग्यपुत्रः वशंस्य पापान् दूरीकरोति। तथा स्वपूर्वजानपि स्वर्गं प्रापयति। ''पुनन्ति साधवः पुत्राः'' आदि गौतम धर्मसूत्राणि 1424—27 इति धर्मसूत्रस्य स्वकथनशैली वर्तते। वस्तुतः अनेन इदमेव स्पष्टीभवति यत् कुलस्य पवित्रता मर्यादा च सर्वोपरि वर्तते। धर्मसूत्रस्य दृष्ट्यां मातृत्वकारणादेव नर्याः महत्वं वर्तते, सा सन्तानस्य जननी अस्ति, अत एव धर्मसूत्रम् अस्य स्पष्टं संकेतं करोति यत् श्रेष्ठजनेषु माता सर्वोपरि वर्तते। ''आचार्यश्रेष्ठो गुरूणां मातेत्येके'' 1256 पवित्रसन्ततेः कृते नार्याः पवित्रता अनिवार्या वर्तते। पवित्रतायाः सम्बन्धः कुलस्य शुद्धतया वैवाहिकसम्बन्धस्य धर्मसम्मतत्वेन आचरणस्य च श्रेष्ठतममस्ति। सन्तानस्य जीवनविकासे मातुः प्रभावः योगदानञ्च सर्वाधिकं भवति। अतः धर्मसूत्राणि नार्याः पवित्रताविषये विशिष्टं बलं ददति। गृहस्थाय, धर्मरक्षणाय तथा जीवनसमाजयोः सन्तुलनं स्थापयितुं विवाहः अनिवार्या श्रेष्ठा च व्यवस्था वर्तते, अतः धर्मसूत्रं विवाहस्य विधौ योग्यतायां वैधतायां च विस्तरेण विचारं प्रस्तौति। गौतम-धर्मसूत्रेऽपि पत्न्याः योग्यतायां तस्या भिन्नप्रवरत्वं मातृपितृपक्षाभ्यां रक्तसम्बन्धात् दूरीभावः इत्यादिषु विचारः तस्याः विवाहस्य भिन्नभेदेषु दृष्टिपातः कृतः। तथा ब्राह्म–प्राजापत्य–आर्ष–दैव–विवाहश्च धर्मसम्मताः कथिताः।

''चत्वारो धर्म्याः प्रथमाः'' । 1—4—12

धर्मशास्त्रेषु प्रेम्णा धनदाननिमित्तेन वा कन्यां प्राप्य कृतः विवाहः उचितः कथ्यते। एतस्य संकेतः गौतम धर्मसूत्रे कृतः 1—4—13

विवाहस्य अनिवार्यतायां धर्मसूत्रकारः तावत् बलं ददाति येन सः स्ववर्णविषयककठोरताम् अपि विस्मरति। सः व्यवहारे सिद्धान्ते च पाशित इव प्रतीयते तथा विवाहाय स्वतन्त्रतां ददाति। सवर्णविवाहस्य श्रेष्ठताप्रतिपादनेन सह अनुलोमविवाहापक्षेया वरस्य निम्नवर्णस्य कन्यया सह विवाहं धर्मसम्मतं कथयति, येन स्पष्टीभवति यत् वैवाहिकसम्बन्धे वर्णानाम् अवरोधः तावत्पर्यन्तं नासीत्। ब्राह्मणेन शुद्धवर्णस्य कन्यायाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पत्नीरूपेण ग्रहणं धर्मसूत्रे स्वीक्रियते। समाजे प्रतिलोमविवाहा अपि प्रचलिता दृश्यन्ते। धर्मसूत्रे केवलम् एतादृशेन विवाहेन समुत्पन्नान् पुत्रान् प्रति सहानुभूतिः नास्ति। तत्र तेषां कृते समाजे धार्मिकस्थानं न दीयते, अपितु धर्माचरणेन आत्मोन्नतिं कर्तुं मार्गः प्रशस्तः क्रियते। तस्य वर्णस्य उत्कर्षः अपि भवितुं शक्नोति। गौतमधर्मसूत्रं प्रतिलोमविवाहेषु आघाताय अनेन विधिना उत्पन्नानां पुत्राणां विषये कथयति ''प्रतिलोमास्तु धर्महीनाः'' एतदपि यत् शूद्रस्त्रीतः उत्पन्नः पुत्रः कर्महीनः भवति, तस्य दर्शनं स्पर्शं प्रतिग्रहं च वर्जितमस्ति। तथा ब्राह्मणानां चतुर्वर्णपत्नीभ्यः उत्पन्नपुत्रेषु वर्णानुसारं सम्पत्तेर्विभाजनं भवति स्म। ''त्रीन्कुमार्य तानतीत्य स्वयं युज्यतेतानिन्दितेनोत्सृज्य पित्र्यानलंकारान्'' विवाहकर्मणि उक्तञ्चः –''द्रव्यादानं विवाहसिद्ध्यर्थं धर्मतन्त्रसंयोगश्च शूद्रात्'' 2924 गौतमधर्मसूत्रस्य दृष्ट्या नार्यै विवाहः अनिवार्योऽस्ति यत् सूत्रकारस्य मतमस्ति यत् कन्या यदा लज्जानुभूतिं कृत्वा वस्त्राधारणं प्रति रुचिं करोति तदानीमेव तस्या विवाहसंस्कारः करणीयः। विवाहस्य प्रमुखलक्ष्यं–सन्तानप्राप्त्यै यस्यै स्त्रियै धर्मसूत्रम् आदेशं ददाति यत् सा स्वपत्युः अतिरिक्तं अपरं प्रति विचारम् अपि न कुर्यात् ''नातिचरेद् भर्तारम्'' 2921 वाण्यां नेत्रयोः कर्मणि च संयमं कुर्यात्। तस्याः पत्युः मृत्युसमये, तस्या सन्तानोत्पत्रौ अयोग्यतायां अपरपुरूषेण यौवनसम्बन्धेन पुत्रोत्पत्तेः विधानं करोति'' अपतिरपत्यलिप्सुर्देवात्'' 294। सन्तानोत्पत्तिः एकं पुण्यकर्म वर्तते। धर्मसूत्रस्य च दृष्ट्या नैतिकताया भावना अस्य धर्मस्याधीना वर्तते। धर्मसूत्रस्य दृष्ट्या स्त्रीपुरूषयोः च सम्बन्धानां प्रमुख प्रेरकः भवेत् न तु कामः। अस्यां धर्मस्य छायायां स्त्रियाः कृते धर्मसूत्रे यथोचितं गौरवदत्तम्। परिवारे समाजे च महत्त्वपूर्णं स्थानं प्रदत्तम्। आचार्यस्य पत्नी आचार्येण समानमेव पूज्यावर्तते। तस्या नामग्रहणं न कुर्यात् ''आचार्यतत्पुत्रदीक्षितनामानि'' 1224। तस्याः चरणस्पर्शः शिष्याय विहितो वर्तते। ''विप्रोष्योपसंग्रहणं गुरूभार्याणाम्'' 1239 किन्तु अस्माकं धर्मसूत्रे नारी अन्यस्मिन् अपि रूपेदृश्यते यदा सा कथञ्चिदपि अधिकारिणी न भूत्वा केवलं मानवस्य सम्पत्तिभूता जायते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृते वर्णितानां मानवीय–मूल्यानाम् उपादेयता

शिखा रानी,
शोधच्छात्रा (संस्कृत विभागः, जेआरएफ)
चौ0चरणसिंहवि वविद्यालयःमेरठम् (उ0प्र0)
दूरभाशः – 9720442702

संस्कृतं भारतस्य अस्मिता अस्ति, राष्ट्रस्य प्राणः भवति। संस्कृतं विना तु भारतस्य कल्पना अपि न भवति। भारत–शब्दस्यार्थैव भा–भायां प्रकाशे रतोऽस्ति। भारतीयज्ञानविज्ञानयोः वाहिका संस्कृतमेवास्ति। समस्तब्रह्माण्डस्य ज्ञानं संस्कृते निहितम्। मानवजीवनस्य साफल्याय यद् ज्ञानम् अपेक्षितं तत्सर्वं संस्कृते समाहितम्। अस्मिन् ज्ञानमहाकोशे मानवस्य न केवलं नैतिकाध्यात्मिकविकासार्थं मानवीयमूल्यतत्त्वानि वर्तन्ते अपितु योग–आयुर्वेद–अध्यात्मज्ञान–चिकित्साशास्त्र–गणित–ज्योतिष स्थापत्य–पर्यावरणविज्ञानादिशाखानां वैज्ञानिकज्ञानमपि संवलितम्। संस्कृते मानवीयमूल्यानामपि भाण्डागारं दृ यते वैदिकसाहित्यं भवेत् अथवा लौकिसाहित्यं सर्वत्र मानवीय–मूल्यानि दृश्यन्ते। सर्वप्रथमं वेदैः बोधितं यत् किं करणीयं किमकरणीयं, कथं व्यवहारः करणीयः कथं जीवनं यापनीयमिति। वेदाः ईश्वरस्य संविधानं वर्तन्ते। अस्माकं प्राचीन–ऋषयः महर्षयः कवयोऽपि मानवजातेः कल्याणार्थं सन्देशं दत्तवन्तः। मानवीयमूल्यानि तानि सन्ति यैः कोऽपि जनः मानवः अर्थात् आदर्शव्यक्तिर्भवितुं अर्हति। यैः विना मनुष्यः प ुवत भवति। एतानि सन्ति–सत्यं, दया, धर्मः, अहिंसा, क्षमा, दानं, परोपकारः, सेवा, ज्येष्ठानामाज्ञापालनं, मित्रता, अनिन्दा इत्यादीनि। धर्मविषये महाभारते उक्तम्–

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।। अर्थात् यः धर्मं न पालयति तस्य ना ाो भवति, किन्तु यः धर्मस्य रक्षां करोति, धर्मः तं रक्षति। धर्मोऽस्ति स्वकीयस्य दायित्वस्य पालनमिति। ऋग्वेदे सत्यविशये कथितम्– सा मा सत्योक्तिः परिपातु वि वतः। सत्यं सर्वासु दिक्षु मनुश्यस्य रक्षां करोति। हितोपदे ास्य एकस्मिन् भलोके सदाचारस्य कियत् उत्तमस्सन्देशोदत्तोऽस्ति–

मातृवत् परदारेषु परद्रव्येशु लोष्टवत्।

आत्मवत् सर्वभूतेशु यः प यति स पण्डितः।।

अर्थात् अन्येषां भार्या मातृसमाना अर्थात् परपत्नीं मातरमिव प यति अन्येषां धनं मृत्समानं। सर्वेऽपि प्राणिनः आत्मसमानाः इति भावयन् यः आचरति सः पण्डितः। यदि एतादृ ी भावना मनसावाचाकर्मणा जनमानसेशु भवेत् तर्हि कुत्रापि चौर्यं, लुण्ठनं, हिंसा, भ्रश्टाचारः, बलात्कार च न भवेयुः। निर्भयाकाण्डं हैदराबादकाण्डं च एतादृ ाानि दुश्कर्माणि न भवेयुः। अद्यत्वे नार्यः सुरक्षिताः न सन्ति। अतः संस्कृतस्य पुनः प्रतिश्ठापनायाः समयः आगतोऽस्ति। समाजे मानव–मूल्यानि प्रति उपेक्षाभावः दृश्यते। अद्यत्वे सर्वत्र सेवाभावः, ज्येश्ठानामवज्ञा, अ ाान्तिः, मानसिकसंतापः, प्रत्येकं गृहे कलहः, ईर्ष्या, द्वेषः, आत्महत्या, चौर्यं, भ्रष्टाचारः, बलात्कार च भवन्ति। अतएव संस्कृते वर्णितानि मूल्यतत्त्वानि अस्माभिराचरणीयानि सन्ति तदैव सम्पूर्णवि वस्मिन् भाान्तिर्भविश्यति। संस्कृतं समाजे वैयक्तिकं भिन्नत्वं समाप्य **"वसुधैव कुटुम्बकम्"** इति शिक्षयति। संस्कृतस्य उद्‌घोषोऽस्ति –

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"परम्परागताधुनिकविद्यालयेषु संस्कृतशिक्षकाणाम् आत्मसम्प्रत्ययस्य वृत्तिसन्तृप्तेश्च अध्ययनम्"

डॉ माताप्रसाद शर्मा
(विभागाध्यक्ष)
शिक्षाशास्त्र विभाग, जरारासंवि, जयपुर

रोहिताश्व यादव
(शोधार्थी) शिक्षाशास्त्र

शिक्षा सभ्य, सुसंस्कृत एवं प्रगतिशील मानवसमाजाय एका आधारशिलायाः निर्माणं करोति। शिक्षा एव एकमात्र साधनमस्ति या पशवः मानवश्च मध्ये अन्तरं करोति। शिक्षा एवं ज्योतिपुंजमस्ति या मानवमस्तिष्कस्य अंहकारात्म अपा कृत्वा ज्ञान प्रकाशम् आलोकयति। यतो हि विष्णु पुराणेऽपि कथ्यते"सा विद्या या विमुक्तये"। अस्यायम् अभिप्रायो यत् एकः वृषभ उच्चैः स्वरेण किमपि भाषमाणः विलक्षणस्वरूपवानोऽस्ति। अस्य वृषभस्य चत्वारि श्रृङ्गा त्रयो पादाः द्वे शीर्षे सप्त हस्ताः च सन्ति। अयं त्रिधा त्रिषु स्थानेषु बद्ध अयं भाषते यत् महादेवः मर्त्यान् आविर्भूतः। भाष्यकारः पतञ्जलिः व्याकरणपरम्परानुसारं व्याख्यां कृतवान्। उभावपि आदर्शभूतौ।

(क) शिक्षणवृत्तिः (Teaching Profession) : "मातृदेवो भव। पितृदेवो भव। आचार्य देवो भव" इत्युपदेशः वर्तते। आचार्यः देवतुल्यः भवति। आचार्यः सर्वगुणभूयिष्ठः स्यात्। तथा च वेदवाक्यमस्ति "देवमिव आचार्यम् उपासीत्" इति।शिक्षणं नाम एका पवित्रवृत्तिः। यद्यपि समाजे अन्याः वृत्तयः सन्ति, तेषां वृत्तिनां लक्ष्यं लाभप्राप्तिः, तन्नाम धनार्जनम्। अन्यासु वृत्तिषु दया, अनुकम्पा इत्यादि मानवीयमूल्यानां कृते स्थानं प्रायः द्रष्टुं न शक्यते। तदेव शिक्षकाणां कृते "गुरुर्ब्रह्मा, गुरुर्विष्णुः, गुरुर्देवो महेश्वरः" इत्युल्लेखो विद्यते। महाकविकालिदासेनापि मालविकाग्निमित्रे उक्तम् –

> श्लिष्टा क्रिया कस्यचिदात्मसंस्था सङ्क्रान्तिरन्यस्य विषयुक्ता।
> यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव।। (1/16)

(ख) वृत्तिसन्तृप्तिः (Job Satisfaction) : वृत्तिः पदस्यार्थः व्यवसायः। सन्तृप्तिः पदस्यार्थः सन्तुष्टिः। अतः वृत्त्या सन्तृप्तिः वृत्तिसन्तृप्तिः इत्यस्य भावः व्यवसायः सन्तुष्टिः इति। आरम्भकालादेव जीवनयापनार्थं बह्व्यः वृत्तयः समाजे विद्यन्ते। जीवाः स्वस्वस्वभावानुसारेण कर्मानुसारेण च वृत्तिषु क्रियाशीलाः भवन्ति। स्वस्ववृत्तिषु सफलतायै सन्तोषः अपेक्षितः।यतः शिक्षणे क्षमता वृत्तिं प्रति अनुकूलाम् अभिवृत्तिमपेक्षते। अभिवृत्तिः तदेव अनूकुला परिवर्तते यदा कश्चित् स्वाश्रितवृत्तौ सन्तुष्टिमनुभवति।

(ग) आत्मप्रत्ययः (Self Concept) : आत्मसम्प्रत्ययस्य तात्पर्यमनुक्रियाणां व्याख्यया सह अस्ति। मानवस्य अनुभव–चिन्तनाभियोग्यता–क्षमता–चारित्रिकगुणैः सम्मिश्रित–प्रत्यक्षीकरणद्वारा प्राप्त प्रदत्तानां प्रस्तुतीकरणेन एवं संगठनेन सह अस्ति।तदैव जने प्रत्ययानां निर्माणं भवति। 1857 तमे खिस्ताब्दे बिनेनामाख्यमनोवैज्ञानिकेनोक्तं यत् "सम्प्रत्ययः अनुक्रियाणां सा व्याख्या वर्तते। यया प्रत्यक्षीकृताऽनुभवैः प्राप्तप्रदत्तानां व्याख्या संगठनञ्च भवति"। सामान्यतया अवबोध्यते यत् असमानतासु समानतानामन्वेषणं विधाय, तेभ्यः एकपृथक् संज्ञा प्रदानमेव "आत्मसम्प्रत्यय" इति नाम्ना सम्बोध्यते। अस्माभिः "सम्प्रत्ययः" योजनासु मानसिकश्रेणिष्वपि गणयितुं शक्यते।

संदर्भ :–

1. विष्णु पुराण
2. पतञ्जलि महाभाष्य
3. मालविकाग्निमित्र – महाकविकालिदास
4. शिक्षामनोविज्ञान – पीडी पाठक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतसाहित्ये वर्णितमूल्यानां द्वारा शिक्षशास्त्र–तन्त्राणामभिवृद्धिः तथैव एतेषांद्वारा भाषाध्यापकेषु कौशलसम्पादनम

तुर्लापाटि शिवरामकृष्णः
(शिक्षा–आचार्यच्छात्रः(प्रथमवर्षम्),

अक्षण्वन्तः कर्णवन्तःसखायो मनोजवेष्वसमा बभूवुः

आदघ्नास उपकक्षास उ त्वे ह्रदाइव स्नात्वा उ त्वे ददृश्रे –ऋ.171.7

परिभाषा – सा विद्या या विमुक्तये इत्युक्त्यनुसारं विद् ज्ञाने अर्थे छात्रेषु अन्धकारं दूरीकृत्य सामाजिक–नैतिक–बौद्धिक–सांस्कृतिकविकाससम्पादनमेव शिक्षायाः परिभाषा भवतीति स्वामीविवेकानन्दमहोदयेन उक्तमासीत् ।

शिक्षकाः मनोविज्ञानिकाः वदन्ति यत् बालकेषु आनुवंशिककारणैः परसिरप्रभावेण समाजस्य कारणेन च वैय्यक्तिकभेदाः भवन्तीति । विशिष्य कक्ष्यायां छात्राणाम् अधिगमने वैविध्यता परिशील्यते अध्यापकैः । तदा शिक्षकाः छात्राणामवबोधाय विविधतन्त्राणामन्वेषणं कुर्वन्ति । यतः शिक्षायाः परमं लक्ष्यं छात्राणामधिगम एव ।तदर्थं अस्माकं संस्कृतसाहित्ये अपि बहुविधतन्त्राणि उपलभ्यन्ते । समग्रसंस्कृतसाहित्यस्य परमोद्देश्यः चतुर्विधपुरुषार्थप्राप्तिः । पत्रेस्मिन् समर्पणे शिक्षाशास्त्राधारितप्रधानांशान् परिशीलयामः

1 शिक्षकः

2 छात्रः

3 पाठ्योपकरणानि

4 समाजः(परिवारः, परिसराश्च)। शिक्षक–छात्रयोः अनुसन्धात्रि भवति शिक्षातन्त्रम् । संस्कृतसाहित्ये प्रस्तावित–शिक्षाशास्त्रसम्बद्ध–तन्त्राणि अधः प्रस्तावितांशानां द्वारा परिशीलयामः ।

1 बोधनपद्धतयः

2 शिक्षासूत्राणि

3 शिक्षोपागमाः

अध्यापनसमये शिक्षकः बहुविधत्वेन छात्राय दृश्येत इति शास्त्रं वदति यथा –उपाध्यायः पण्डितः शिक्षकः अध्यापकः आचार्यः गुरुः इति भिन्नरूपैः कर्तव्यं वहति शिक्षिकः । तथैव आधुनिककेन्द्रियविद्यासंस्थानां उद्देश्येषु एवमेकः अंशः दृश्यते ।शिक्षकः स्वबोधनशैल्या छात्रेषु अधिगमस्तरवर्धनीयमिति । भाषाध्यापकानां मुख्यं कार्यं छात्रेषु चतुर्णां कौशलानां सम्पादनम् । भाषाधिगमस्य चत्वारि सोपानानि श्रवणं भाषाणं पठनं लेखनं च भवन्ति । एकेन चक्रेण न रथस्य गतिर्भवेत् वत् चतुर्षु कौशलेषु कस्यापि अभावः भवति तर्हि भाषाधिगमः न जायते । छात्रेषु । भाषा– कौशलानां द्वारा छात्रेषु बुद्धिविकासं मनोविज्ञानं कुशलत्वं विश्वासं अनुशासनं च सम्पादयितुं शक्यते । अतः तदर्थं छात्रः प्रेरितः भवेत् ।

संस्कृतसाहित्ये शिक्षासम्बद्धविषयाः – मनोवैज्ञिनिकदृष्ट्या छात्रेषु बुद्धि–मानसिक–सामजिक–सांस्कृतिक–अनुशासनयुक्तज्ञानसम्पादनाय संस्कृतभाषायां काव्यसाहित्ये कथासाहित्ये उपनिषद्सु, वेदेषु इइतिहासग्रन्थेषु चौनेके अंशाः वर्णिताः सन्ति । तेभ्यः एकमुदाहरणमात्रमधः उक्तमस्ति–

कालिदासविरचित–मालविका!ग्निमित्रे शिक्षकस्य लक्षणानि एवं वर्णितानि

शिलष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ।।– मालविकाग्निमित्रम् ।
यरू ज्ञानवान् भवति सरू शिक्षकरू भवितुं शक्नोति द्य किञ्च स्वेनाधिगतं ज्ञानमितरेभ्यो नैपुण्येन सङ्क्रामयितुं शक्नोति सरू उत्तमशिक्षकरू भवितुमर्हतिद्य तथा च न केवलं ज्ञानार्जनम् अपि तु तत्प्रकटनमपि अध्यापकस्यावश्यकं लक्षणमिति कालिदासस्याभिप्राय सर्वेषां शिक्षकाणां बोधनकौशलमावश्यकम् विद्याभ्यासविषये कालिदासेन या प्रक्रिया सूचिता अस्ति सा प्रक्रिया सार्वकालिकी सार्वभौमिकी च वरीवर्ति ।
जीवनमूल्यानि उद्दिश्य तैत्तरीयोपनिषदि अपि शिक्षावल्यां केचन अंशाः निर्दिष्टाः यथा दृ मातृदेवो भव। पितृदेवो भव इति आरभ्य एषः आदेशः एष उपदेशः एतदनुशासनं पर्यन्तं विद्यायाः अनन्तरमपि छात्रेण कथं जीवितव्यं कथं व्यवहर्तव्यमिति उपदेशमन्त्राः सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाकविभासविरचितेषु नाटकेषु मूल्यानाम् विवेचनम्

सुनिता चौधरी
शोधछात्राः (साहित्य)
जरारासंस्कृतविश्वविद्यालय जयपुर (राज)

प्रस्तावना –

प्राचीनकाले संस्कृतं न केवलं साहित्यिकभाषा किन्तु साधारण व्यावहारिकी भाषाष्यासीत् अनन्तरकाले उत्पन्नाः स्थानीयभाषाः संस्कृतभाषाया, साहित्येन च अत्यन्तं प्रभाविताः अभवन्त पाणिन्यादयो महर्षयः सूत्रसाहित्यस्य प्रणयनमकुर्वन्।

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतम्।
रावणं मन्यमाना मां सीता भीता भविष्यति।।

विषयप्रवेश –

संस्कृतसाहित्य क्षेत्रे प्रथमनाटककारः महाकविभासः 327 ईपू मन्यन्ते प्रथितयशसां भाससौमिल्लकविपुत्रादिनां प्रबन्धानतिक्रम्य कथं वर्तमानस्य कवे कालिदासस्य कृतौ बहुमानः

१ सूत्रधार कृतारम्भैर्नाटकैर्बहुभभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैखि।।

२ भासनाटकचक्रेऽपिच्क्षेकैः क्षिजे परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः।।

नाटकस्य प्रयोजनानि –

१ हितोपदेशजननम् – जनानां समाजस्य च कल्याणार्थम् उपदेशः।
२ विश्रात्तिपनन – सामाजिकानां मानसिकग्लानेः अपननेन विश्रान्तिकल्पनम्।
३ विनोदजननम् – जनानां मनोर†जनम्।

नाटकशिक्षणस्य उद्देश्यानि –

१ मानवस्वभावस्य अध्ययनम्   २ विभिन्नजीवनदर्शनानां ज्ञानम्
३ संवादशिक्षा   ४ भावाभिव्यक्ति
५ अनुकरणस्य अवसर   ६ विभिन्नपरिस्थितीनां ज्ञानम् स्वस्थमनो†जनम्
७ हितोपदेशः।

महाभारतासम्बद्धेषु भासविरचितेषु नाटकेषु रेखाचित्रमाध्यमेन सामान्यपरिचयः –

१ उदयनकथाश्रित
I. प्रतिज्ञायौगन्धरायणम्   II. स्वप्नवासदत्तम्

२ लोककथाश्रित
I. अविमारकम्   II. चारदत्तम्

३ रामायणाश्रित
I. प्रतिमानाटकम्   II. अभिषेकनाटकम्

नाटकेषु मूल्यानां विवेचनम् –

अथ सर्वत्र सर्वेभ्य जनेभ्य शिक्षा समुपमब्धा भवेदितिधिया सर्वकारेणावि षष्ठवर्षादारभ्य चतुर्दशवर्षपर्यन्तं निःशुल्काऽनिर्वार्या च शिक्षा कृता वर्तते।

वृत यात्रेन संरक्षेत, वित्तमेति च यात्रि च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अक्षीणो वित्ततः क्षीणो वित्तमेति हतो हतः।।

जीवनमूल्यानां परिभाषाः – मनुस्मृतो मनु कथयति –

धृतिर्क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।
सर्वेभवन्तु सुखिनः सर्वेसन्तु निरामयाः।
सर्वेभाद्राणि वश्यन्तु मा कश्चिद् दुःखभाग भवेत्।।

जीवनमूल्यानां वैशिष्ट्यकम् –

१ मूल्यानां सम्बन्धो व्यक्तिः समाजस्य चाचारतिचारेषु दृश्यते।

२ मूल्यानि वयक्तेर्व्यवहारेषु परिदृश्यन्ते कस्यापि समाजस्य आदर्शाः, सिद्धान्ताः, विश्वासाः नैतिकनियमाः मानदण्डाश्चानेके भवति। परन्तु समाजे केषाश्चिदचिकं महत्वम्न्येषाश्च न्यूनं महत्वं परिदृश्यते।

मूल्यानां वर्गीकरणम् –

१ शैक्षिकमूल्यानि, नैतिकमूल्याने

२ सामाजिक – राजनैतिकमूल्यानि वैश्चिकमूल्यानि, विज्ञानिक, सांस्कृति, पर्यावरणीयः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपाकर्मणः वैज्ञानिकोपादेयता

सूर्यप्रकाश ओझा
शोधच्छात्रः SVVU TIRUPATI

उपाकर्मणः तात्पर्यमस्ति प्रारंभणम् । उपाकरणस्य अर्थः आरंभणाय निमंत्रणम् उत पार्श्वगमनम् । वैदिककाले इदं वेदानाम् अध्ययनाय शिष्याणां गुरोः पार्श्वे एकत्रीभवनस्य कालः आसीत् । अस्य विधानकालः धर्मग्रंथेषु वर्णितः यत् यदा औषधीनां प्रादुर्भवनं भवति तदा श्रावणमासस्य पौर्णमास्यां उत भाद्रपदमासस्य हस्तनक्षत्रयुक्तायां कस्यामपि तिथौ उपाकरणं विधीयते । अध्ययनसत्रस्य सम्पूर्तिः उत्सर्जनम् उत्सर्गं वा कथितः । जीवनस्य वैज्ञानिकप्रक्रियायां उपाकर्म द्वितीयो जन्म गदितः । यः द्वितीयं जन्ममाप्नोति स एव 'द्विजः' उच्यते । 'द्विजत्वेन चिंतनम्, चरित्रम्, व्यवहार इत्येतेषां पवित्रीकरणं सम्भवति । स वेदाध्ययने दक्षो भवति । नवोपनीताः समे ब्रह्मचारिणः श्रावण्यां पौष्ठपद्यां वा उपाकर्म विधाय गुरोर्गृहं गत्वा वेदानधीयते । तथा चाह मनुः–

श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथा विधिः
युक्तश्च्छन्दांस्यधीयीत् मासान् विप्रोऽर्ध पंचमान् ॥

भाद्रपदमासादारभ्य मार्गशीर्षामावासीं यावद्वेदाध्ययनं प्रचलति । इमे वेदा अपात यामाः भवेयुरेतदर्थं ब्राह्मणाः प्रतिदिनं सन्ध्यामुपास्य भगवतः समक्षम् उपविश्य वेदाध्ययनं कुर्वन्ति । अतएव ज्ञानयज्ञरूपः स्वाध्यायो गृहस्थानामनिवार्य इति– 'स्वाध्याये नित्ययुक्तः स्यात्' 'स्वाध्यायं सततं कुर्यात्' इति च स्मृतिवचनम् एवं सन्ध्योपासनमीश्वरोपासनं चास्य यज्ञस्य विशिष्टं कर्म ।
याज्ञवल्क्यस्मृतौ –

अध्यायानां उपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य तु ।।

अध्येतृणाम् उपाकर्म श्रावणमासस्य पौर्णमास्यायां उत श्रवणनक्षत्रे गदितः । यदि श्रावणमासे यदि औषधीनां प्रादुर्भावो न भवति तर्हि हस्तनक्षत्रयुक्तस्य भाद्रपदमासे उपाकरणस्य व्यवस्था कृता । सामगास्तु अस्मिन्नेव काले उपाकर्म कुर्वन्ति ।

पौषमासस्य रोहिण्याम् अष्टकायां अथापि वा
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः । ।

पौषमासस्य रोहिणीनक्षत्रयुततिथौ अष्टकायां वा वेदशास्त्राध्ययनस्य उत्सर्जनं पुष्करिण्याः समीपे कुर्यात् ।

त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ।
उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा । ।

त्र्यहम् अनध्यायः इदं नियमनं शिष्याणां गुरुणां ऋत्विजां च मृते विहितः । उपाकर्मणः विधानः यस्मिन् दिने भवति तद्दिने वेदशास्त्रस्य अनध्यायः गदितः ततः परं दिनद्वयस्य अनध्यायः । तथा च उत्सर्गेऽपि दिनत्रयस्य अनध्यायः भणितः । स्वशाखीयश्रौत्रियस्य मृते सत्यपि दिनत्रयस्य अनध्यायो भवति ।

संध्यागर्जितनिर्घात भूकंपोल्कानिपातने ।
समाप्य वेदं द्युनिशं आरण्यकं अधीत्य च । ।

सन्ध्याकाले मेघगर्जने सति भूकम्पे उल्कानिपातने च अनध्यायः गदितः । मन्त्रब्राह्मणस्य समाप्तौ , आरण्यकाध्ययनस्य समाप्तौ च अहोरात्रस्य अनध्यायः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतज्ञानविज्ञानस्य वैश्विक चिन्तनम्

छात्र – श्रीराम झा
आचार्य,
शिक्षा शास्त्र

वैश्वीकरणस्य स्वरूपम्

जगति अनेकेषां देशानां सामाजिक –आर्थिक राजनैतिक क्षेत्रेषु एकः अन्यत् देशैः सह निकटता–एकीकरणं च वैश्वीकरणम् इति कथ्यते। कोऽपि बस्तुः सेवा, विचारः प्रद्धतिः अथवा सिद्धान्तं विश्वव्यापीकरणमेव तेषां वस्तुः सेवा, विचारः पद्धतिः अथवा सिद्धान्तानां वैश्वीकरणं कथ्यते। प्रत्येक देशस्य अन्यदेशेन सह वस्तुः सेवा, पूँजी, बौद्धिक–सम्प्रदायाः अप्रतिबन्धित–आदान–प्रदानमेव वैश्वीकरणं वर्तते। भूमण्डलीकृत विश्वस्य निर्माता प्रक्रिया व्यापार क्षेत्रे श्रम अन्वेषणार्थं विदेश गमने, आर्थिक मल्यांकने शिक्षा क्षेत्रे, अन्यान्य वस्तूनांम् आयात–निर्यात क्षेत्रे क्रियमाणं कार्यम् एव भूमण्डलीकरणम्। वैश्वीकरणस्य स्थापना जुलाई 1944 तमे वर्षे अभूत्। औद्योगिक विकासः, सूचना क्रान्तिः मानवस्य अभूतपूर्वा उपलब्धिः वर्तते । यत्र सूचना क्रान्तिः इत्यस्य विकासेन अधुना सम्पूर्ण विश्वम् एकं वैश्विक ग्रामरूपं दृश्यते। सूचनायाः अत्यधिक संकलनम् तस्य देशस्य ज्ञानवान–शक्तिसम्पननता च उद्बोध्यते। आधुनिक सूचनाक्रान्तेः सूत्रपातः प्रसिद्धः वैज्ञानिकः आर्थर सी क्लार्कस्य " संचार उपग्रह" इत्यस्य कल्पनायाः स्वरूपम् अस्ति । प्राचीन कलादेव भारतीयाः जनाः सद्भावस्य पक्षपातिनः सन्ति। विश्वघटकेषु सर्वेष्वपि देशेषु निवसतां जनानां परस्पंर सहयोगः प्रेम मैत्री च सद्भावः विद्यते । अनया भावनया कस्यापि जनस्य विशेषे धर्मे सम्प्रदाये जातौ भाषायां निष्ठायां तस्य मानवता एव सामान्य धर्मः भवति। सद्भावे दृढीजाते जनः मानवतायाः प्रसाधकः भ्रातृभावस्य संस्थापकः देशस्य , विश्वस्य, राज्यस्य सम्प्रदायस्य धर्मस्य जाते : भाशायाश्च एकतायाः प्रसाधको भवितुमर्हति। सद्भावेनैव मानवतायाः मXलं जायते। प्राणी शिव स्वरूपः भवति। देशकालातीतः जायते सम्पूर्ण विश्वस्य एक राष्ट्रमिव समावलोकयति विश्वेऽस्मन् सर्वेषां देशानां निवासिषु विविध आचार–विचार वेषभूषा संस्कृति राष्ट्रीयता – आहार विहार भाषादि भेदेष्वपि विभिन्नासु तत्र गुण दोषो दि चिन्तनम् परित्यज्य तेषां सदगुणानां समीचीनता प्रशंसनं जनानां समक्षं प्रकाशन७ सद्भाव पद वाच्यं भवति । विश्वस्य विभिन्नेषु राष्ट्रेषु विविधाकृति– वर्ण जाति धर्म सम्प्रदायानां विविधाः जनाः निवसन्ति परं ते मूलरूपेण मानव जातीयाः मानवाः एव विद्यन्ते। सर्वेषाम आत्मा ईश्वरश्चैकोऽस्ति । अतः विश्वबन्धुत्व भावना, अन्तराष्ट्रिय भावना (भूमण्डलीकरणभावना) वैश्वीकरणभावना एकतायाः भावना सद्भावेन एव समुदति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारी सशक्तिकरणम्

मुकुन्दकुमार झा
एमए, शिक्षा शास्त्र

वैदिक कालात् आरभ्य इदानीम् समाजे स्त्रीणां स्थानम् अतीव गौरवास्पदमं विद्यते। नारी शब्दस्य व्युत्पत्तिः – ' न अरिः इति नारी' शब्दकोष ग्रन्थे नुः नस्य वा धर्म्या इत्यपि व्युत्पत्ति उपलभ्यते। एवं सिद्धयति यत् पुरूषाणां कृते नारी सर्वथा मित्रवत् कार्यं करोति। नारी गृहिणी, गृहस्वामिनी, सहधर्मिणी, इत्यादिभिः विशेषणैः सम्बोध्यते स्म। जन्मनः विवाह, समयं यावत् पितुः गृहे, 'कन्या' इति पावन शब्देन बाच्यायाः अस्याः समाजे अस्माकं महत्वम् परमम् अस्ति। पत्नी रूपेण सा गृहस्वामिनी पदम् अल४चकार। वेदे यथोच्यते–

"सम्राज्ञी श्वसुरे भव सम्राज्ञी श्वश्रवां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ।। (ऋग्वेद) 10/85/46
जायेदस्तम् जाया एव अस्तं गृहमित्यर्थः। (ऋग्वेद) 3/53/4

गृहस्थाश्रमे नार्यः प्राधान्यं दुश्यते। अस्माकं शास्त्रेषु अपि कथितम् –

" न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते। (प४चतन्त्र 3/146)

यत्र गृहेषु नार्याः सम्मानं भवति। गृहस्य सर्वै जनैः नारीणां सुखस्य प्रसन्नतायाश्च चिन्तनं क्रियते तत्र सदैव लक्ष्म्या वासो भवति। एतादृशेषु गृहेषु सर्वेषां देवानां महती कृपा भवति। अस्मिन विषये कथितम् मनना:–

" यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रिया ।। (मनुस्मृति 3/56)

अथर्ववेदे स्त्रीगुणानामपि वर्णनं प्राप्यते। सा तेजोवती, कुलपा, पतिहितकारिणी, मृदुभाषिणी सरला, अक्रोधना, पतिव्रता, अज्ञाकारिणी, प्रसन्नचिता च स्यात्।

पत्याऽविराधयन्ती (अर्थववेद 2/36/4)
जाया पत्ये मधुमतीं वाचं वदतु शान्तिनाम्। (अथर्ववेद 3/3/2)
पत्युरनुव्रता भूत्वा स नह्यस्वामृताय कम्। (अथर्व – 14/1/42)

एवं विज्ञायते यत् प्राचीन भारते स्त्रीणां स्थानं महत्वपूर्णम् आसीत्। महामानवेन मनुना उक्तम् यत् समाजे नारीणां स्थानं तथैव वर्तते यथा देवालये देवानाम् । स्त्रीपुरूष सामन्जस्यरूपेण भावने जीवनमपि सुखकरं करणीयम् इत्येकमेव अस्माकं समाजस्य देशस्य च समुन्नतिं भवितुं शक्यते । देशस्य सभ्यतायाः संस्कृत्याः च मूल्यांकनं नारीवर्गं दृष्ट्वैव क्रियते। पितृदेवोभव' 'मातृदेवो भव' इत्यादिभिः उक्तिभिः नारीणां स्थानं वैदिककाले स्पष्टमेव आभाति। शंकराचायाद् आरभ्य स्वामीविवेकानन्दं यावत् सर्वैः महापुरूषैः मातृशक्ति संस्तुता। अनेन पर्यालोचनेन स्पष्टमेतत् यत् भारतीय संस्कृतौ नारीणां स्थितिः प्रशंसनीया पूजनीया च अस्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाक्यार्थाभिज्ञानम्

नरेशसिंहः , शोधच्छात्रः (व्याकरणम्)
जगद्गुरु–रामानन्दाचार्य–राजस्थान–संस्कृत–विश्वविद्यालयः, जयपुरम् ।

वाक्यलक्षणम्

सर्वैः ज्ञायते यत् पदसाधुत्वान्वाख्यायकं व्याकरणशास्त्रं शब्दानुशासन–नाम्ना पदशास्त्ररूपेण प्रसिद्धिमावहति। अर्थैकत्वादें वाक्यं साकाङ्क्षं चेद् विभागे स्यात् इति मीमांसासूत्रम् 2–1–46

1) पदसङ्घातजं वाक्यम् । – व्याडिः

2) पदसमुहो वाक्यमर्थपरिसमाप्तौ कौटिल्य–अर्थशास्त्रे ।

3) एकार्थः पदसमुहो वाक्यम् । – काशिका

सूत्रम् तिङ्ङतिङः 8–1–28 इति ।

सूत्रस्य अतिङ इतिपदेनज्ञायते यथा पचति , भवति , पश्य , मृगो धावति इत्यादि ।

कात्यायनः पतञ्जलिश्च

वार्तिककारेण भाष्यकारेण च प्राचीनाचार्याणां विभिन्नलक्षणानि सङ्ग्रह्य वाक्यस्य चत्वारि लक्षणानि उदितानि तथाहि

अ) – आख्यातं साव्ययकारकविशेषणं वाक्यम् ।

आ) सक्रियाविशेषणञ्च

इ) आख्यातं सविशेषणम् ।

ई) एकतिङ् इति ।

1) वाक्यस्य भेदाः

भर्तृहरिणोक्तम्

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ।।

वाक्यस्य भेदनक्रमे कथ्यते यत् वाक्यं मुख्यतया द्विविधं मुख्यतया सखण्डमखण्डञ्चेति । तत्र सखण्डवाक्यस्य पञ्चभेदाः सन्ति । अखण्डपक्षे वाक्यस्य त्रयो भेदाः सन्ति ।

2) वाक्यस्य अङ्गानि दृ

" उच्यते इत्यस्माद्वाक्यम् , वचेर्ण्यति । चजोः कुघिण्यतोः" इत्यादीनां कुत्वम् । शब्दसञ्ज्ञत्वाद् वचोऽशब्दसञ्ज्ञायाम् । अनेन निषेधो न भवति । एतद्विपरितं वाक्यमेव सिद्धयति , वाच्यं तु कुत्सिते दीने वचनार्थं च वाक्यवाद् इति कोशः ।

वाक्यरचनायाः प्राक् वाक्यस्य अङ्गानि चिन्त्यन्ते । तन्माध्यमेन सम्पूर्णार्थप्रकाशकस्य वाक्यस्य रचना क्रियते। वाक्यस्याङ्गानि इमानि भवितुं शक्यन्ते वाक्यार्थाभिज्ञाने शाब्दबोधस्य महत्त्वपूर्णं स्थानं वरिवर्ति । यदि वाक्यानां शाब्दबोधः न क्रियते तर्हि वाक्यार्थस्य स्पष्टता एव न जायेत , वाक्यार्थबोधस्य विभिन्नैः आचार्यैः स्व–स्वमतानुसारेण विवरणं कृतं वर्तते।वाक्यार्थाभिज्ञानं केन प्रकारेण सम्यक् ज्ञायेत तदर्थं आचार्यैः सिद्धान्ताः प्रतिपादिताः । तेषां विवरणं विस्तृते लेखे प्रस्तोष्यते । इति ।

सन्दर्भग्रन्थाः

1) वैयाकरणभूषणसारः2) परमलघुमञ्जूषा3) वाक्यपदीयम्4) वाक्यार्थविवेचनम् । (डॉ धनुर्धरझा)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूम्यन्तर्गतजलस्थाननिरीक्षणम्

डॉ. मीनाक्षी योगी
ज्योतिर्विद्

जलस्य प्रश्नम् पृष्टुम् जलस्थानम् निरीक्षणाय प्रेरयति । तदर्थम् ज्योतिषशास्त्रस्य प्रश्नमार्गे जलसूचकायाः विविधाः केन्द्राः प्रोक्तम् । तात्कालिकं लग्नादिनां विचारः कर्त्तव्यम् । प्रश्नकुण्डल्यां लग्नात् चतुर्थस्थानम् भूम्यन्तर्गतजलस्थानं, सप्तमस्थानं नदीजलम्, दशमस्थानम् वृष्टिजलं, लग्नं च सामान्यं जल विचारणीयम् । अत्र ग्रहाणां बलं दृष्ट्वा भूरिजलं कथनीयम्। ग्रहाणां बलं न्यूनं चेत् न्यूनं जलं वाच्यम् यथोक्तं प्रश्नमार्गे–

हिबुकेनाधस्सलिलं नयागमनं तु सप्तमेनैव ।
दशमेन वृष्टिपतनं केन्द्रविशेषास्तोयं ह्येते ।।1।।[23]

भूजलस्य शिराज्ञानम्–

यदि चरलग्नं चेत् शिराएकैव वहति । यदि स्थिरं लग्नं चेत् बहवः शिराः प्रवहन्ति ।

भूम्यन्तर्गत जलस्थान निरीक्षणम्

बृहत्संहितायां वर्णितमस्ति –

जलपरिहिने देशे दृश्यन्ते अनुपजानि चिन्हानि ।
वीरणदूर्वा मृदवश्च यत्र तस्मिन् जलं पुरुषे ।।2।।

एवं प्रकारेण अस्मिन् शोधप्रबन्धे विविधानां जलस्थानानां जलशीराः प्राप्तिस्थानानां परीक्षण नीरीक्षणञ्च करिष्यामि । ये विषयाः साम्प्रतिक समाजस्यकृते महदुपयोगि सिद्धिर्भविष्यति ।

-1प्र.म.25 / 89

-2बृ.सं. / 54 / 47[23]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याकरणसम्मतसृष्टिविज्ञानम्

डॉ. दयारामदास
सहायक आचार्य, व्याकरण विभाग
जरारासंविवि, जयपुर

व्याकरणशास्त्रे भागद्वयं प्रसिद्धम्। एकं प्रक्रियाप्रधानम् अन्यद् दर्शनप्रधानम्। यद्यपि दर्शने आत्मचर्चैव प्राधान्येन भवति, तथापि तदुपयोगितया सृष्टिचर्चापि कर्तव्या भवत्येव, यतो हि पूर्णरूपेण सृष्टिस्वरूपं ज्ञात्वैव ततो विरज्यति लोकः।

सृष्टिपदमत्र सृज्विसर्गे धातोः कर्मणि क्तिन्प्रत्यये सति दृश्यप्रपंचपरम्। विशिष्टं ज्ञानं विज्ञानम् सृष्टेः विज्ञानम् सृष्टिविज्ञानम्। तत्र प्रथमं पाणिनिसम्मतसृष्टि विज्ञानमुच्यते पाणिनिमते शब्दब्रह्म एव जगत उपादानकारणं वर्तते। तत्र महर्षिपाणिनेः प्रातिपदिकसंज्ञासूत्रमुपस्थापयामि –**'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'**[24] इति। पदं पदमिति प्रतिपदम्, प्रतिपदगृह्णाति[25] प्रातिपंदिकमिति व्युत्पत्त्या शब्दस्य सर्वस्थानस्थितत्वाद् व्यापकत्वम्। अधातुरित्यस्य धातुः सर्वशब्दप्रकृतिः, सोऽविद्यमानो यत्र व्युत्पत्त्या, अप्रत्यय इत्यस्य चाविद्यमानः प्रत्ययो यत्रेति व्युत्पत्त्या चाधात्वप्रत्ययपदाभ्यां प्रकृतिप्रत्ययविभागसाहित्यं संहृतक्रमरूपत्वमपरिच्छिन्नत्वं च शब्दब्रह्मण इति सूचितम्। अर्थवदित्यनेन च घटपटाद्यर्थयुक्तत्वं सूच्यते। तथा च महर्षिपाणिनिनार्थवदिति सूत्रं विरचय्यापरिच्छिन्नः पूर्वापरीभावशून्यः, अत एवोत्पादविनाशरहितो व्यापकोऽर्थवानेव शब्दो ब्रह्मेत्यत्राभिप्रायः प्रदर्शितः। अत्रार्थशब्देन च शक्तिरवगम्यते। तथा च ब्रह्मणि शक्तिमत्त्वमायाति। एवं च शक्तिमद् ब्रह्मैव सृष्टिं करोतीति निष्कर्षः। अत एव केषाञ्चिद् वैयाकरणानां मते शक्तिमत्त्वमर्थवत्त्वमिति वर्तते।

एतदनन्तरं च **'कृत्तद्धितसमासाश्च'**[26]इति सूत्रयता महर्षिपाणिनिना शब्दब्रह्मणि कर्तृत्वं पालकत्वं संहारकत्वमपि प्रदर्शितम्। तद् यथा करोतीति कृदित्यनेन जगत्स्रष्टृत्वम्, तस्मादुत्पन्नाय जगते हितस्तद्धित इत्यनेन रक्षकत्वम्, समसनं संक्षेपकरणमिति समास इत्यनेन संहारशक्तिमत्त्वमिति।

व्याकरणसम्मतसृष्टिविज्ञाने श्रुत्यादिप्रमाणम्

यथान्ये परमाण्वादिभ्यः जगत्सर्गं मन्यन्ते, तथैव व्याकरणदर्शने शब्दतः एव सृष्टिः स्वीक्रियते। अत्रार्थे श्रुतयोऽपि प्रमाणभूताः। तथाहि –

वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम्।
अथेद् वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्चनाह।।[27]

वागेव बुद्ध्यात्मना स्थितं सूक्ष्मं वाक्तत्त्वमेव, विश्वा भुवानि सर्वाणि भुवानि वाच्यवाचकोभयात्मकानि, जज्ञे जाता, इन्द्रियाणि प्राणं च द्वारीकृत्य।

शब्दब्रह्मपूर्विकासृष्टिर्मनुनापि उक्ता –

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।[28]

बादरायणेनापि भगवता **"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्"**[29] इति सूत्रेण वेदशब्देभ्यो जगतः सृष्टिः कथिता।

---

[24]अष्टाध्यायी 1.2.45
[25]पदोत्तरपदं गृह्णाति (अष्टाध्यायी 4.3.39)
[26]अष्टाध्यायी 1.2.46
[27]वा. ब्र. हरिवृषभटीका श्लोकः 120
[28]मनुस्मृतिः 1.21
[29]ब्रह्मसूत्रम् 1.3.28

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपनिषद्युगिनी शिक्षाव्यवस्था

आशीष शर्मा
शोधच्छात्र
शिक्षा–विभाग
ज.रा.रा.सं.वि.वि, जयपुर

उदीयमानभारतेऽस्मिन् प्रायशः मानवः शिक्षयैव स्वबुद्धिं व्यनक्ति। अल्पीयसि काले अधिकाधिकं फलं प्राप्त्यर्थं सर्वदैव जनाः शिक्षया तत्पराः प्रयतामानाश्च भवन्ति। प्राचीनकालादारभ्यः जनाः सामाजिक–परिस्थित्यनुसारं स्वस्य व्यवहारं समायोजनं कुर्वन्ति। शिक्षायाः मुख्योद्देश्यमासीत्–

"सा विद्या या विमुक्तये"

अर्थात् सूक्ष्मदृष्ट्या विचारयामश्चेत् अपवर्गप्राप्त्यर्थं शिक्षा सर्वश्रेष्ठ निधिरस्ति। आचार्यः पूर्वःपम्। अन्तेवास्युत्तरःपम्। विद्यासन्धिः। प्रवचनं सन्धानम्। इत्यधिविधम्।

गुरुशिष्ययोः मध्ये विद्यार्जनाय प्रवचनद्वारा या प्रक्रिया प्रचलति सा शिक्षा। शिक्षयति इत्यनेन कः ?, कं ?, किं ?, शिक्षयति ? इति जिज्ञासायां गुरुः शिष्यं शिक्षयति इत्युत्तरं लभ्यते। समाजे व्यक्तीनां व्यवहारेषु सत्वसम्पादनाय प्रशिक्षणम् अपेक्षितम्। प्रशिक्षितो मानवः विवेकी सन्दुर्व्यवहारेभ्यो निवर्तते सद व्यवहारेषु च प्रवर्तते। तादृश परिष्कार–सम्पादक–संस्कारः शिक्षया सेत्स्यति। तथा च व्यक्तेः व्यवहार परिष्कारेण परिवर्तन सम्पादिका नैतिकमूल्यपोषिक प्रक्रिया शिक्षा इत्युच्यते।

वेदविद्यावता आद्यां स्मृति परम्परामुदभावयता मनुना भूतेषु प्राणिनां, प्राणिषु बुद्धिजीविनां, बुद्धिमत्सु नराणां, नरेषु ब्राह्मणानां, ब्राह्मणेषुविदुषां,विद्वत्सु कृतबुद्धिषु कर्तृणां, कर्तृषु, ब्रह्मविदां श्रेष्ठता समाख्याता। तथाहि–

भूतानां प्राणिनः श्रेष्ठा प्राणिनां बुद्धिजीविनः ।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥
ब्रह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः ।
कृतबुद्धिषु कर्तारः कर्त्तृषु ब्रह्मवेदिनः ॥

'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति खलु वेदघोषः। सा विद्या एव प्रकृष्टाया विद्या मुक्तिं प्रददाति। वेद–शास्त्र–विज्ञानादीनां साध्वनुशीलने तत्त्वार्थ ज्ञानं च विद्येति स्वीक्रियते।

उपनिषदाम् अनुसारेण द्वे विद्ये परा अपरा च। यया विद्यया लौकिकं ज्ञानं जायते, सा अपरा विद्या। यया च अक्षर–ब्रह्मविषयकं ज्ञानं जायते, सा परा विद्या। लोकेऽस्मिन्विद्या एव तज्ज्योतिः यद्मान वेज्ञानज्योतिं ज्वालयति, अविद्यान्धतमसं व्यपोहति, दुर्गुणगणं वारयति, सद्गुणततिं संचारयति, कीर्तिं प्रथयति, गौरवं विकासयति, यशो वितनोति, भूभृतत्सु च आदरम् आवहति। एषा मातृवत्संरक्षिका, पितृवत्सत्पथ प्रदर्शिका, कान्तावत्सुखदा मनोरञ्जिका च, कीर्तिप्रदा, वैभवदायिनी, दुर्गुणगणनाशेन मनसः पावयित्री च। सर्वमनोरथपूरणात्सेयं कल्पलतेति परिज्ञायते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारी सशक्तीकरणस्य आवश्यकता वर्तमान सन्दर्भे

उषा मिश्रा
शोधच्छात्रा
साहित्यम्
ज०रा०रा०सं०वि०वि० जयपुरम्

सारांशः—

संसाररुपी रथस्य द्वि चक्रे स्तः। नरः च नारी च। उभयोरपि समानं महत्वं वर्तते। उक्तं च **"एकेन चक्रेण रथस्य गतिर्न भवति।"** अस्माकं आदिग्रन्थेषु नारीणां महत्वं वर्णितं वर्तते यत्

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता"।

प्राचीनकाले स्त्रीणां स्थानं गौरवपूर्णनम् आसीत् तथा ताः अधिक शिक्षिता आसन्। गार्गी,मैत्रयी,घोषा,लोपामुद्रा आद्या विदुष्यः वेदशास्त्रार्थ निपुणा आसन्। गार्गी याज्ञवल्क्येन सह शास्त्रार्थं कृतवती। तदा याज्ञवल्क्य गार्ग्याः बहुप्रश्नेन क्रोधितो अभवत् तथा गार्ग्यैः अकथयत् "गार्गी माति प्राक्षी र्मा ते मूर्धा व्याप्त" तथापि गार्गी क्रोधं न कृतवती। गार्ग्याः प्रश्नानां आधारेण "बृहदारण्यक उपनिषद" ऋचानां निर्माणम् अभवत्। नारी शक्त्याः अन्यम् अद्‌भुतम् उदाहरणं रामायणे पतिव्रता सीता वर्तते। सा त्यागस्य मूर्तिः गहनविपत्तौ अपि विचलिता न भवति। विश्पला वैदिक युगीन नारी आसीत्। युद्धे तस्याः द्वौ अपि पादौ छिन्नौ अभवतामं तथापि सा विचलिता न भवति तथा शत्रुयि विहितं धनं जितवती। महाभारते द्रौपदी अपि सशक्तः नार्यः उदाहरणं वर्तते। सा युधिष्ठरं युद्धं प्रति प्रेरितवती। अद्य एकम् अपि क्षेत्रं नास्ति,यत्र नार्याः प्रभावो नास्ति। अनेका नार्यः संसदसदस्याः सन्ति। अस्यामेव श्रंखलायाम् अम्तरिक्ष वैज्ञानिकाः विशिष्टा गवेषिका कल्पना चावला प्रमुखं स्थानं लभते। सा प्रथमा महिला अन्तरिक्ष यात्री आसीत्। यदा वयं अन्यत्र पश्यामः तदा समाजे अद्य स्त्रीणां जना स्त्रियोचित सम्मानं न कुर्वन्ति। अस्मात् कारणात् बहुनि घटनानि अभवत्। यथा—२०१२ तमे वर्षे दिसम्बरमासस्य षोडश दिनाङ्के देहल्यां घटितं निर्भयाकाण्डं तथा त हैदराबादस्य दिशा रेड्डी घटनाक्रमं—२०१९ नार्यः दुर्दशायाः प्रमाणानि अद्य समाजे प्रतिदिनं दृश्यन्ते। अद्य नार्यः जीवनं सुरक्षितं न वर्तते। आधुनिक काले स्त्रियः सशक्तिकरणम् अनिवार्यम्। सर्वैः नारीणाम् आदरः करणीयः। नारी एव समर्थ पुरुषस्य जननी अस्ति। अतः अद्य आधुनिक युगे नारी सशक्तीकरणस्य महती आवश्यकता वर्तते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारतीयसाहित्ये मूल्यतत्त्वविमर्शः

रुनिस्मिता प्रीतिपुष्पा
शोधच्छात्रा
साहित्य-विभाग
ज.रा.रा.सं.वि.वि, जयपुर

मूल्यमिति शब्दं श्रुत्वा अस्माकं मनसि एकैव विचारोत्पद्यते यत् अस्य वस्तुनः इदं मानम्। इत्थं वयं कथयितुं शक्नुमः यत् यानि तत्त्वानि अस्माकं संस्कृतेः मानं निर्धारयन्ति तानि एव अस्माकं मूल्यानि। भारतीय संस्कृतेः यदा नाम आयाति तदा सर्वप्रथमं वेदवेदाङ्गानां चिन्तनं भवति। वैदिकमूल्यानि अद्यापि प्रासंगिकानि सन्ति। वेदवेदाङ्गेषु भौतिकी पारमार्थिकी च सत्तायाः विषयः जीवनमूल्यानि (संस्काराः) योगोक्षेमोपयोगिता इहलौकिकपारलौकिकयोः सूक्ष्मप्रौढचुन्तनम् इत्यादीनि प्रतिपादितानि सन्ति **श्रुतेरिवार्थं स्मृतिरन्वगच्छत्**[30] इति सिद्धान्तवत् वेदाः भारतीयानां मूल्यतत्त्वानि प्रतिपादयन्ति वेदाङ्गानि च तेषामनुशीलनं, रक्षणञ्च कुर्वन्ति।

कस्यापि संस्कृतेः आधारः तस्य मूल्यानि भवन्ति। मूल्यानि एव कर्तव्यार्क्तयोः , आचारव्यवहारयोः, अर्हानर्हयोः च निर्धारणं कुर्वन्ति। अस्माकं मूल्यानि धर्मरक्षणाय निर्धारितानि सन्ति। अस्माकं धर्मव्यवस्था **मनुर्भव**[31] इति सिद्धान्तमनुसरति। तत्र नैतिकमूल्यानि प्रतिपादितानि सन्ति। नैतिकमूल्यानि मनुष्यत्वं द्योतयन्ति। धर्मविषये कथितमस्ति यत्-

धारणाद्धर्ममित्याहुः धर्मो धारयते प्रजाः।
यः स्याद् धारणसंयुक्तं सः धर्म इति निश्चयः।।[32]

ईशोपनिषदः मन्त्रादेव महात्मागान्धिना **ट्रस्टशिप** सिद्धान्तः प्रतिपादितः। ट्रस्टशिपसिद्धान्ते प्रतिपादितं यत् अस्मिन् विश्वे ये वस्तुनः पदार्थाः च सन्ति ते परमात्मना व्याप्तमस्ति। पदार्थेषु कस्यापि सत्तात्मिका स्थितिः न विद्यते। परमात्मन सार्वभौमिकी सत्ता विद्यते। ईशोपनिषदि लिखितमस्ति-

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जिथाः मा गृधः कस्यस्विद्धनम्॥[33]

अनया भावनया प्राप्ताप्राप्तयोः, सिद्ध्यासिद्ध्योः च विषये शोक-वियोग-हर्षादिकञ्च न भवति। अनेन मनुष्याणां मनसि सहृदयता सहानभूतिः औदार्यादिकञ्चोत्पद्यन्ते।

सदाचारस्य पालनमपि अस्माकं सांस्कृतिकमूल्यं वर्तते **आचारः परमो धर्मः**[34] इति वचनं मनुस्मृतौ मनुमहाराजः प्रतिपादितम्। सदाचारपलनेनैव श्रेष्ठत्वं गुणोत्कृष्टत्वं च मानवाः भजन्ते।

---

[30]रघुवंश.२/१

[31]ऋग्वेद.५

[32]धर्मकर्मसमुच्चय

[33]ईशावास्योपनिषद.१

[34]मनुस्मृति.२/१०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आश्रमव्यवस्थाऽपि अस्माकं सामाजिकमूल्येषु समाहिताः भवन्ति । आश्रमव्यवस्थायां तु वयः क्रमेण मनुष्यस्य जीवनचर्या निर्धारिता अस्ति । चत्वारः आश्रमाः वर्तन्ते तत्र प्रथमः ब्रह्मचर्याश्रमः। अस्मिन् काले बालकस्य शिक्षादीक्षयोः कर्माणि भवन्ति । द्वितीयो गृहस्थाश्रमः आश्रमेषु श्रेष्ठः कथ्यते । आश्रमे ऽस्मिन् मनुष्याः सपत्निकाः भूत्वा स्वकर्तव्यं कुर्वन्ति । अस्मिन्नेव भौतिकी, मानसिकी च समुन्नतिमवाप्नुवन्ति । पञ्चमहायज्ञाः अपि अस्मिन् आश्रमे एव अनुष्ठीयन्ते । तृतीयो आश्रमः वानप्रस्थाश्रमः। आश्रमे ऽस्मिन् मनुष्याः ईश्वराराधनाय वने गच्छन्ति तस्मात् त्यागस्य भावना उपजायते । चतुर्थो आश्रमः सन्यासाश्रमः। आश्रमेऽस्मिन् मनुष्यः मोक्षप्राप्तये ईश्वराराधने सर्वं त्यक्त्वा पूर्णरुपेण नियोजितो भवति । अत्र मनुष्याणां मनसि राग, भय, हर्ष, क्रोधादिकञ्च न भवति ।

अस्माकं संस्कृतिः मनुष्याणां कृते षोडशसंस्काराणां निर्धारणं करोति । तेषां परिगणनं गर्भाधानाद् अन्त्येष्ठि पर्यन्तं भवति । ते मनुष्याणां जीवनकाले ये ये संस्कारकतत्त्वानि सन्ति तेषां निर्वाहः कथं कथं भवेदिति अस्य निर्धारणं कुर्वन्ति । अस्माकं संस्काराः जन्मनात् प्राक् प्रारब्धाः भूत्वा जीवनपर्यन्तं कर्तव्यनिर्धारणं कुर्वन्ति ।

भारतीयसाहित्ये राष्ट्रीयभावनाऽपि मूल्येषु परिगण्यते । ऋग्वेदे राष्ट्रस्य ध्रुवात्मिका स्थितिः भवेदिति स्तुतिः कृताऽस्ति- **राष्ट्रं धारयतां ध्रुवम्**[35] । रामायणे राष्ट्रस्य महत्त्वं दर्शयितुं रामः लक्ष्मणं प्रति कथयति यत्-

अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते ।
जननि जन्मभूमिश्च स्वर्गादपि गरीयसि ।[36]

अर्थात् लंका स्वर्णमयी अस्ति तथापि रामाय न रोचते यतोहि जननि जन्मभूमिश्च महत्त्वपूर्णं स्थानं भजति स्वर्गादपि ।

मानवीयमूल्यानि सजिवानि भवेत् । समेषां चेतसि शुद्धा भावना भवेत् । तैत्तिरीयोपनिषदि वर्णितमस्ति यत्- **सत्यं वद, धर्मं चर, स्वाध्यायान्माप्रमदः**[37]। वयं समेषां कृते आकांक्षामहे देवाः भद्रं वितरन्तु । आदर्शसमाजस्य संस्थापना भवेत् । सच्चरित्रस्य निर्माणं भवेत् । सर्वे समाहित मनसाः भवेयुः।

भद्रं वद दक्षिणतो, भद्रमुत्तरतो वद ।

भद्रं पुरस्तान्नो वद, भद्रं पश्चात् कपिञ्जलः॥

॥ इति शम् ॥

---

[35]ऋग्वेद.८/८/२३

[36]रामायण काण्ड.७

[37]तैत्तरियोपनिषद.बल्ली.२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाट्यशास्त्रीयपरम्परायां महापुरुषशंकरदेवस्य अङ्कीयानाटकानिकृएका समीक्षा

डॉ. कमल लोचन आत्रेयः
सह–अध्यापकः
संस्कृतसाहित्यविभागः
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः,नलबारी,असमः

भारतीयनाट्यपरम्पराया आधारग्रन्थोस्ति भरतमुनिविरचितं नाट्यशास्त्रम्। अतो भारतवर्षस्य विविधप्रान्तीयसाहित्ये यानि नाटकानि संरचितान्यभवन् तेषु नाट्यशास्त्रस्य संस्कृतनाट्यपरम्पराया वा प्रभाव अस्ति न वेति, अस्ति चेत् कियानस्तीति विषयौ नूनं सम्यगध्ययनमपेक्षेते।असमप्रदेशे ईशवीये पञ्चदशशताब्दे लब्धजन्मा महापुरुषशङ्करदेवः नववैष्णवधर्मप्रचाररूपं महदुद्देश्यं पुरस्कृत्य बहूनि नाटकानि विरचयामास।महापुरुषस्यास्य नाटकान्येव असमीयासाहित्ये उपलब्धेषु नाटकेषु आदिमतमानि सन्ति।शङ्करदेवस्य नाटकानि असमीयासाहित्ये 'अङ्कीयानाट'नाम्ना प्रसिद्धिं लभन्ते।सम्प्रत्युपलब्धानि शंकरदेवस्य षण्नाटकानि सन्ति दृ पत्नीप्रसादं, पारिजातहरणं, कालियादमनं, रुक्मिणीहरणं, केलिगोपालं, श्रीरामविजयं, चेति।यद्यपि नाटकेष्वेषु मुख्यतया मैथिलीमिश्रिता व्रजावलीनामिका प्राचीना असमीयाभाषा प्रयुक्ता, तथापि मध्ये– मध्ये संस्कृतगद्यांशः संस्कृतश्लोकाश्चापि दरीदृश्यन्ते।तेषु भरतमुनिकृतस्य नाट्यशास्त्रस्य प्रभावोपि भूयो भूयः परिलक्ष्यते। उदाहरणतया दृ नाट्यारम्भे नान्दीपाठः, सूत्रधारस्य प्रयोगः,मध्ये मध्ये प्रयुक्ताः संस्कृतश्लोकाः, अन्ते भरतवाक्यं मङ्गलभटिमा वा इत्येतानि बहूनि सादृश्यान्यत्र दृश्यन्ते।यद्यपि शंकरदेवस्य नाटकानि संस्कृतनाट्यपरम्परया भृशं प्रभावान्वितानि सन्ति तथाप्येषु बहुत्र नाट्यशास्त्रोक्तनियमानाम् उल्लङ्घनं शैथिल्यं चापि दृष्टिपथि आयाति, येन एतेषामङ्कीयानाटकानां स्वकीयत्वं शंकरदेवस्य मौलिकत्वं चापि विस्पष्टमनुमीयते।अतः शोधपत्रेस्मिन् शंकरदेवस्य अङ्कीयानाटकेषु कुत्र कुत्र नाट्यशास्त्रीयपरम्परायाः प्रभावो दृश्यते कुत्र चौतानि स्वकीयत्वं भजन्ते इति उन्मेषणस्य विनम्रप्रयासो विधीयते।शोधकर्मण्यस्मिन् तुलनात्मकं विश्लेषणात्मकं च शोधविधी प्रयुज्येते ।।इति दिक्।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्ययाऽमृतमश्नुते

डॉ.कृष्णा शर्मा
सह–आचार्या,विभागाध्यक्षा
धर्मशास्त्रविभागः ,
राष्ट्रिय– संस्कृत– संस्थानम् ,
एकलव्यपरिसरः, अगरतला , त्रिपुरा ।

अस्मिन् संसारे यस्य जन्म भवति तस्य मृत्युरपि निश्चितः।मानवजीवने गमनागमनस्य चक्रमेवमेव प्रचलति ।भगवद्गीतायां भगवद्कृष्णेनोक्तं यत् –८ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्ममृतस्य च । मानवजन्मस्योद्देश्यं किमस्ति ? जन्मतःमृत्युपर्यन्तं एषा यात्रा केन प्रकारेण यातव्या ? स्वस्य कानि कानि कर्त्तव्यानि सन्ति ? एतादृशानां प्रश्नानां समाधानविषये अस्माकम् ऋषिभिःनैकाःग्रन्थाः प्रणीताः। श्रुतिस्मृतिपुराणादिषु ग्रन्थेषु आचारव्यवहारप्रायश्चित्तादीनि विषयानि प्रतिपादितानि ।एतेषां विषयाणाम् उत्कृष्टबुद्धिः श्रद्धयावबोधनमर्हति । उत्कृष्टप्रज्ञाप्राप्त्यर्थं , शास्त्रसिद्धिर्प्रयोजनार्थं विद्यार्जनमावश्यकम् । यतोहि विद्यामाध्यमेनैवेह संसारं पारयति जनः। इशोपनिषदि उक्तञ्च–

विद्यां चाविद्यां च यस्तद्वेदोमयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।। (11)

अर्थात् यः विद्याम् अविद्यां च ज्ञात्वा मृत्युं तीर्त्वा विद्यया अमृततत्वं प्राप्नोति । अत्र विद्याशब्दःविशिष्टार्थे प्रयुक्तः।सामान्यरूपेण तु यस्य कस्याऽपि विषये ज्ञानार्जनं विद्या उच्यते किन्तु यत् ज्ञानं ज्ञानार्जनयोग्यं न भवति तत् अविद्यानाम्ना प्रतिथम् यथा – द्यूतविद्या ,चौरविद्या इत्यादयः ।एताः विद्याः तु सन्ति किन्तु ज्ञानार्जनधारणयोग्याः च न सन्ति।अतः द्यूतविद्या इत्यासाम् धारणयोग्यज्ञानं नावश्यकम् । विद्याविद्ययोर्भेदस्य ज्ञानमावश्यकम् ।यतोहि अविद्यायाः ज्ञानेनैव विद्यायाः ज्ञानं संभवम्। अनयोः विद्ययोः परस्परभेदविषये ज्ञात्वैव स्वात्मज्ञानं बोधयितुं शक्यते ।विद्या द्विविधा परा अपरा च ।वैदिकयुगे पराविद्या विकसिताऽसीत् यया अक्षरं ब्रह्म मन्यते स्म ।पराविद्या उपनिषद्विद्यास्ति यया अपराविद्या प्रतिष्ठाता ।परब्रह्मापरब्रह्मेति उभे उपनिषद्विद्यया वेदविद्यया च विजिज्ञासितव्ये।

द्वितीया अपराविद्या वेद –वेदांगेतिहास –पुराण –न्यायशास्त्रान्वीक्षिकीत्यादयः विद्यायाः चतुर्दशस्थानानां विषये याज्ञवल्क्येनोक्तम् –

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदस्थानानि विद्यानां धर्मस्य च चतुर्दशः ।। या. स्मृ. / आचाराध्यायः /०४

वैदिकशिक्षायाःस्वरूपं द्विविधं वर्तते । प्रथमं वैदिकसूक्तानि ,मन्त्रास्तेषां ब्रह्मणानि। द्वितीयं सूक्तादीनां यज्ञकर्मणि विनियोगः।वैदिकसाहित्यस्य रचनायां वेदाङ्गानां– शिक्षा–कल्प–निरुक्त छन्द–ज्योतिष –व्याकरणानां ज्ञानमपेक्षते ।वेदाङ्गानां ज्ञानं न केवलं मन्त्राणां रचनायै अपितु तेषामर्थबोधाय तदनु विनियोगायाप्यपरिहार्यमस्ति ,मनुनापि उक्तम्–

वेदशास्त्रार्थतत्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ।।
सर्वेषामपि चौतेषामात्मज्ञानं परं स्मृतम्।
तदध्यग्रयं सर्वविद्यानां प्राप्यते ह्यमृतं ततः । मनुस्मृतिः १२/१०२

यःवेदशास्त्रस्यार्थतत्वं जानाति यत्र तत्राश्रमे स्थित्वा नित्यनैमित्तिककर्मानुगृहीतब्रह्मज्ञानेन अस्मिन्नेव लोके तिष्ठन् बह्मतत्वाय कल्पते । आत्मज्ञानं परं तत्त्वमस्ति इत्यर्थं प्रतिपादनाय मनुना विषयाणां विभाजनं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्गत्रयेण कृतम्, यथा – लौकिकं वैदिकं वाऽपि तथाध्यात्मिकमेव च । मनुस्मृतिः २/११ तत्र लौकिकस्तु शिल्पकला ,वाणिज्यौद्योगिकी शिक्षा,वेदवेदाङ्गानां साङ्गोपाङ्गाध्ययनं वैदिकशिक्षा तथा च आन्वीक्षिकी, आध्यात्मिकीशिक्षारूपेण गण्यते ।

एवमेव महाभारते श्रेष्ठयोपपन्नानां जनानां महत्त्वपूर्णोपलब्धिःसंसर्गविद्या प्रतिभाति । तत्र बहूनां पदानां समाहारः संसर्गे लक्ष्यत इति ष्संसर्गविद्यासुष इति पदेन स्पष्टम् । कौरवाः संसर्गविद्यानिष्णाता आसन् ।तद्यथा सोमसूरिणा व्यवहृतं संसर्गविद्या–नाट्य–नृत्य–संगीतादि–मनोरञ्जनात्मिकी प्रतिभाति ।

कौटिल्यस्तु अर्थशास्त्रस्यविनयाधिकरणे विद्यानां परिधिं परिभाषते स्म । तदनुसारेण तत्त्वार्थदृष्ट्या विद्याचतस्रः– आन्वीक्षिकी , त्रयी, वार्ता दण्डनीतिश्च । आन्वीक्षिकी हेतुविद्या –आत्मविद्या अस्ति । ऋक्यजुसामवेदानां समावेशो त्रयीविद्यायां वर्तते ।कृषिपशुपालनव्यापारित्यादिनां निर्देशिका विद्या ,वार्ता । दण्डस्वरूपप्रतिपादिका विद्या दण्डनीतिः वर्तते ।

अतः साररूपेण वक्तुं शक्यते यत् चतस्रविद्यारूपी अमृततत्वं प्राप्त्यर्थं वैदिकशिक्षापद्धतौ वैदिककालानन्तरं सदैव धर्मशास्त्राणामध्ययनाध्यापनं सारभूतं दृश्यते ।तत्र श्रौतसूत्रधर्मसूत्र गृह्यसूत्राणां स्मृतीनां पुराणेतिहासानां चान्यतमं स्थानं वर्तते ।एतैर्विषयैर्वर्णाश्रमसंस्थायाः संरचना विकासश्च समारब्धः ।मनुनापि उक्तम्–

प्रत्यक्षम् चानुमानं च शास्त्रं च विविधागमनम् ।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सिता ।।
तपो विद्या च विप्रस्य निःश्रेयस्करं परम्।
तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते।। मनुस्मृतिः १२/१०५,१०४

,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतज्ञानविज्ञानस्य वैश्विकचिन्तनम्
मनोवैज्ञानिकाधारेण अभिप्रेरणया महत्त्वम्

सुरेन्द्र कुमार शर्मा
शोधच्छात्रः
जगद्गुरूरामानन्दाचार्य राजस्थानसंस्कृतविश्वविद्यालय जयपुरम्

कश्चित् प्राणी व्यवहारं किमर्थं करोति ? प्रत्येकं व्यवहारस्य कारणमभिप्रेरणा सन्ति। अभिप्रेणा एका एतादृशी प्रक्रिया वर्तते। यस्यां मनुष्यस्य आन्तरिक शक्तयः वातावरणे मानवान विभिन्न लक्ष्याणां वस्तूनि प्रति निवेदिताः भवन्ति। प्रत्येकं व्यवहारस्याधारः प्रेरकवृत्तिः MOTIVE भवति।
वुडवर्थमहाभागानुसारम् – "प्रेरकवृत्तिः मनुष्यस्य सा मनोदशा वर्तते या निश्चित् उद्देश्यस्य पूर्त्यर्थं तं निश्चितव्यवहार सम्पादनार्थं बाहनाति।"

यत् प्रेरकवृत्तेः त्रीणी कार्याणि सन्ति क्रियायाः प्राररम्भणम् क्रियां लक्ष्यं प्रति निर्देशनम्, लक्ष्यपूर्ति यावत् क्रियायाः निरन्तरता च। यथा उदरे भोजनस्याभावस्यावस्थाम् आवश्यकता, बुभुक्षां प्रणोदनं तथा भोजनस्य सामग्री मुद्दीपनं वक्तुं शक्नुमः।
टामसन महोदयेन अभिप्रेरकाः द्वयोः वर्गयोः विभाजिता दृ

क. प्राकृतिक दृअभिप्रेरणा (NATURAL MOTIVES)

ख. कृत्रिम् दृ अभिप्रेरणा (ARTIFICIAL MOTIVES)

अभिप्रेरणप्रक्रियाया छात्रेषु रुच्युत्पादनं भवति। टामसन महोदयस्य अभिप्रेरणा रूच्युत्पादनस्य कला मन्यते। रूचिः अधिगमस्य कुञ्जिका वर्तते। उचिताभिप्रेरणेन छात्रेषु उच्चादर्शानां स्थायिभावानाञ्च स्थापना भवति। तेषां संकल्पशक्तिः दृढीभवति तथा बालकेषु नैतिकं चारित्रिकं च विकासो सम्भवति।
अस्मिन् शोधपत्रे अभिप्रेरणया सम्बद्धान विविधअंशान् निरुपयति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मानसिकस्वास्थ्य विज्ञानं च मानसिकस्वास्थ्यश्च

निशा पारासर
शोधच्छात्रा:

जगद्गुरूरामानन्दाचार्य राजस्थानसंस्कृतविश्वविद्यालय जयपुरम्

येन विश्वविद्यालयस्य एकः स्नातकः क्लीफोर्ड बीयर्स महोदयः स्वगृहस्य चतुर्थतलात आत्महत्याकरणार्थम् अकूर्दत। येन केन कारणेन स जीवितः। विकृत दृ मानसिक दृ स्थितौ त्रीणि वर्षाणि यावत विभिन्नेषु मानसिक चिकित्सालयेषु तेन चिकित्सा प्राप्ता। स्वास्थ्यलाभसमये बहवः अनुभवाः प्राप्ताः। तेषां आधारेण तेन 1908 तमे वर्षे एकं पुस्तकं ए माइन्ड दैट फाउन्ड इटसैल्फ लिखितम्। अनेन पुस्तकेन चिकित्सका मनोवैज्ञानिका मनोचिकित्सकाश्च नवीनरीत्या चिन्तनस्य कृते बाध्याः जाताः। एवं चिन्तनेन मानसिक स्वास्थ्यविज्ञानस्य सूत्रपात सञ्जातः।

यस्य विज्ञानस्य उद्देश्यं सन्तुलितमानसिक विकास करणमस्ति तत् मानसिक स्वास्थ्यविज्ञानं कथ्यते। शाब्दिकार्थे यत् मानसिक स्वस्थं आरोग्यं वा करोति। तत् एव मानसिक स्वास्थ्य दृ विज्ञानमिति। येन प्रकारेण शारीरिकस्वास्थ्य विज्ञानस्य सम्बन्धः शरीरेण भवति। तथैव मानसिकस्वास्थ्य विज्ञानस्य सम्बन्धः मस्तिष्केण भवति। वयं वक्तुं शक्नुम् यत् यस्य उद्देश्यं मानसिकस्वास्थ्यस्य रक्षणं मस्तिष्कं रोगमुक्तकरणं मानसिकरोगाणामुपचारकरणश्च भवति तत् एव मानसिकस्वास्थ्य कथ्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

औपनिषदानि विद्याविधानानि

Dr STP KANAKAVALLI
Post Doctoral Research Fellowship
Rastriya Sanskrit Vidyapeetha]
tpty

वैदिककाले मनोवैज्ञानिकपद्धतेः प्राधान्यमासीत् । यतो हि तदानीं शिक्षाविधानं छात्रकेन्द्रितमासीत् । छात्रं कथमध्यापनीयं येन तस्य चिन्तनाशक्तिः, व्यवहारं च उत्तमं भवेत् तद्विषये सर्वदा गुरुः चिन्तयति । छात्रस्य स्तरानुगुणं तं विविधोदाहरणैः बोधयति । समयानुगुणं तं परीक्षत्यपि । तद्वारा छात्रस्य एकाग्रतायाः, बुद्धिकौशलस्य, समयस्पूर्तेश्च परीक्षमपि करोति स्म गुरुः । तदानीं विविधपद्धत्याः पाठनं , पठितांशस्य पर्यवेक्षणं , पुनः मूल्याङ्कनकरणं च इति प्रक्रिया आसीत् ।यदि छात्रः विषयावगहने किञ्चिदमान्द्यं प्रदर्शयति चेत् तदा गुरु तस्य स्तरानुगुणेन अध्यापयति । अत्र गुरुः सर्वदा मित्रवत् आचरति । अत्र

ॐ सह नाववतु ।
सह नौ भुनक्तु ।
सहवीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ।
ॐ शान्तिः शान्तिः शान्तिः ।।

अनेन मन्त्रेण गुरुशिष्ययोः मध्ये स्नेहवात्सल्यादिभावना दरिदृश्यते ।

शिक्षायाः विधानम् –

अत्र विद्यायाः मुख्योद्देश्यमासीत् व्यक्तित्वविकासः, आत्मसंयमनं, पराविद्यायाः ज्ञानम्, अन्तस्थिताज्ञानस्य दूरीकरणम् इत्यादयः ।

मनोवैज्ञानिकपद्धत्या एवं छात्रकेन्द्रिता आसीत् । अत्र व्याख्यान, प्रत्यक्ष, अनुमान, उदाहरणादिविविधपद्धत्याः अध्यापयन्ति स्म ।

अत्र शिक्षणसूत्राणि सूक्ष्मात् कठिनं प्रति, अनुमानादुपमानं प्रति , अज्ञानात् ज्ञानं प्रति इत्यादि विविधसूत्राणामुपयोगः अकृतम् ।

छात्रस्य सम्पूर्णविकासाय बलमधिकं ददति स्म । तत्र विषयस्य अर्थावगहनेन सह विषयप्रस्तुतीकरणे अपि महत्त्वमधिकमासीत् ।

मूल्याङ्कनं विविधरूपेण स्वीकुर्वन्ति स्म । यथा दृ कुत्रचित् स्थलेषु कण्ठस्थीकरणद्वारा, कुत्रचित् शलाकया, कुत्रचित् सूत्रविधया, कुत्रचित् व्याख्यानेन , कुत्रचित् तर्कविधया च परीक्षां स्वीकुर्वन्ति । समयानुगुणं परीक्षणं कुर्वन्ति स्म । छात्रस्य प्रगतिं दृष्ट्वा पाठनस्य पुरोगतिर्वा पाठनपद्धतिर्वा परिवर्तनं कुर्वन्ति स्म ।

शोधपत्रेऽस्मिन् प्रस्तावितांशाः–

प्रस्तावना

दशोपनिषदः ज्ञानम्

विद्यायाः अध्ययनाऽध्यापनस्य विधानम्

उपसंहारः

इत्येकैकमपि अंशः विस्तरेण निरुप्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दर्शनभेदाः

अभिनव शर्मा
शोधच्छात्र:
दर्शनविभागः
जगद्गुरुरामानंदाचार्य राजस्थान संस्कृत विश्वविद्यालय जयपुर

अस्य वस्तुतः तत्वसाक्षात्काराय भारतीयाभूमिरेव गरियसी । अतः अत्रैव दर्शनानाम् अनादिकालात् प्रचारःप्रसारो वा मन्तव्यः। तथा च अत्रत्यमनीषिणां विचारानेव पुरस्कृत्य दर्शनस्य प्रकाराः किं वा क्रियन्ति दर्शनानि इत्यस्य प्रश्र्नस्य उत्तरमपि भारतीयानुसारमेव भवेदिति निश्र्चन्वन्ति विद्वान्सः।

भारतेऽपि विविधानि दर्शनानि सन्ति प्रचलितानि तथाऽपि मुख्यतया आस्तिकदर्शनं नास्तिकदर्शनमितिकृत्वा दर्शनस्य द्वैविध्यं भणन्ति चिन्तकाः। प्रसङ्गे चात्र यानि वेदानुसारीणि तानि आस्तिकदर्शनानि यानि च वेदविरुद्धानि तानि नास्तिकदर्शनानि इति विज्ञातव्यम् ।

आस्तिकदर्शनेषु षड्दर्शनानि सन्ति प्रसिद्धानि

तथा हि ---- सांख्ययोगन्यायवैशेषिकपूर्वमीमांसा–उत्तरमीमांसा इति ।

यद्यपि वैयाकरणाः स्वकीयं पृथगेव व्याकरणदर्शनं मन्वते अतः सर्वं संकलय्य सप्त दर्शनानि भवन्ति। इमानि सर्वाण्येव तत्वसाक्षात्काराय उपयोगितां वहन्ति यस्य विस्तृतःविचारः शोधप्रबन्धलेखने एव ।

नास्तिकदर्शनानि च पुनः यानि वेदविरुद्धानि तानि सन्ति त्रीणि जैनबौद्धचार्वाकदर्शनानीतिकृत्वा एतेषां त्रैविध्यं प्रसिद्धम्। यद्यपि आधुनिके काले एकम् अन्यदपि नास्तिकदर्शनम् उत्पन्नं यस्य नाम वर्तते मार्क्सवादः यस्य महतासमारोहेन खण्डनमकारि श्रीमत्स्वामिकरपात्रपादैः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाभारतेदाम्पत्यजीवनविमर्शः

मनीषाकुमारी

शोधच्छात्रा

ज.रा.रा.सं.वि.वि

महाभारतमहाकाव्यं एकं एतादृशंमहाकाव्यं यस्मिन् भारतस्य समस्तसांस्कृतिकपक्षाणांसामाजिकपक्षाणां, आध्यात्मिकपक्षाणां, धार्मिकपक्षाणाञ्च वर्णनं वर्तते । महाभारतमहाकाव्ये एकलक्षश्लोकानांसमावेशः वर्तते । वस्तुतः महाभारतंअष्टादशपर्वणस्य एकं अद्भुतंअद्वितीयञ्च महाकाव्यंइतिआधुनिकसंस्कृतज्ञैः कथ्यन्ते । अतः चिन्तनस्य विषयः वर्तते यत् महाभारतमहाकाव्येदाम्पत्यजीवनविषयेकिमपिवर्णनंवर्तते न वा । तर्हिउत्तरमागच्छति यत् महाभारतमहाकाव्येदाम्पत्यजीवनसन्दर्भेबहुनि उद्धरणानिसन्ति । यस्मिन् पाञ्चालनरेशस्य पुत्री द्रौपद्याः दाम्पत्यजीवनं एकं विचित्रं अद्भुतञ्च वर्तते । कारणंतुद्रौपद्याः पञ्च पतयः आसनितिमहाभारतेउल्लिखितंवर्तते । यद्यपि एकस्याः स्त्रीयाः पञ्चपतयः न भवन्तिइतिद्रुपदः अपिकथयति यथा–

नैकस्याबहवः पुंसः श्रूयन्तेपतयः क्वचित् ।

लोकवेदविरुद्धं त्वंनाधर्म धर्मविच्छुचिः।

कर्तुमर्हसिकौन्तेय कस्मात्तेबुद्धिरीदृशी॥

अनेन श्लोकेनस्पष्टंभवति यत् पञ्चपतयः न भवन्तीति शास्त्रोक्तवचनंवर्तते।कारणंतुद्रुपदः शास्त्रज्ञाताआसीत् अत एव उक्तवान् । इतोऽपिमहाभारतस्य एकाकथाविराटनरेशस्य पुत्री चित्रायाः वर्तते । यस्याः पाणिग्रहणंअभिमन्वाः सहअभवत् । चित्रायाः विवाहमपिअद्भुतंअलौकिकञ्च अभवदितिवर्णनंवर्तते । तथापि यासांमहाभारतकालीन स्त्रीणांजीवनमुत्तमं धर्मयुक्तञ्च व्यतीतम् ।

अस्मिन् शोधपत्रे इतोऽपिमहाभारतेवर्णितदाम्पत्यजीवनस्य सन्दर्भितकथायाः वर्णनं कृतोवर्तते । यः वर्तमानसमाजस्य कृतेदर्पणरूपेणमार्गदर्शनं स्व दर्शनञ्च कारयिष्यतिइत्याशयः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतवाङ्मये मानवीय मूल्यानि

रवि कुमार वर्मा
ज.रा.रा.सं.वि.वि

अस्मिन् भौतिक युगे वर्तमान काले च मानवीय मूल्यानां महती आवश्यकता वर्तते। मानवीयमूल्यानि सन्ति – दया, दाक्षिण्यं , क्षमा, परोपकारः, परस्परं सहयोगभावना, मैत्री, करुणा, प्रेमपूरितप्रेमभावना, परिवारे समाजे च सामञ्जस्यभावना, सच्चरित्रं धैर्यं व त्यागः मनोबलं च इत्यादयः।

संस्कृत साहित्ये वाङ्मये च मानवीय मूल्यानाम् अनेकानि उदाहरणानि सन्ति येभ्यः मानवाः स्वजीवनं सफलं सुन्दरं च कर्तुं शक्नुवन्ति। वर्तमानकाले मानवीयमूल्येषु ह्रासो जायते। मानवो मानवीय मूल्यानि विस्मृत्य स्वविवेक शक्त्या सामर्थ्यम् उचितावसरे न प्रयुज्यते। स्वदैव शक्तिं व्यक्त्वा पाशविकार्येषु संलग्नः जायते यस्य दिग्दर्शनं समाजे दृश्यते।

मानवीय मूल्यानां अभावे मानवः सदाचारं त्यक्तवा दुराचारं प्रति संलग्नो जायते। सूक्ति वर्तते – "शीलं परं भूषणम्"।

पावनभारतभूम्योपरि यत्र प्रत्येकः बालः रामस्वरूपः बालाः च देवीस्वरुपा सन्ति, तत्रैव स्वस्वरुपं निजमानवीय मूल्यान् ज्ञात्वा स्वगृहं स्वपरिवारं स्वसमाजं स्वराष्ट्रं च उन्नतिं प्रति नीत्वा स्वयोगदानं दातुं शक्नुवन्ति।

दया मानवीय मूल्यस्य विषये प्रत्येकस्मिन् मनसि दयापूरितस्य ह्रदयस्य आवश्यकता वर्तते। अस्मिन् विषये श्रीतुलसीदासस्य वक्तव्यं दृ

दया धर्म का मूल है पाप मूल अभिमान।
तुलसी दया न छोडिए जब तक घट में प्राण।।

सहयोगस्य दानस्य वा विषये अभावग्रस्तजनान रुप्यकाणाम् वस्त्राणाम् अपि दानं दत्वा नरे एव नारायण स्वरूपमं मत्वा सहयोगः कर्त्तव्यः।

सत्यवादिता विषये श्री कबीरदासस्य वक्तव्यम्

साँच बराबर तप नही झूठ बराबर पाप।
जांके हिरदे सांच है तांके हिरदे आपे।।

"सत्यमेव जयते नानृतम्" मुण्डकोपनिषदि सूक्ति वर्तते। सादृश्यता विषये प्रत्येकं मनुजं सर्वं जनं स्वसमानं मत्वा समाजे विषमतायाः निवारणोः कर्त्तव्यम् विभेदता मानवसमाजं खण्डितं करोति एकरूपतया सभ्यसमाजस्य निर्माणं भवति। जातिगतक्षेत्रगत् भाषागतभेदानां निवारणं कर्त्तव्यं यतोहि अस्माकं उत्पत्तेः कारणं एकमेव ईश्वरः अस्ति श्री गुरूनानक महोदयस्य कथनं अस्ति दृ

अव्वल अल्ला नूर उपाया कुदरत के सब बन्दे।
एक नूर से सब जग उपज्या कौन भले कौन मन्दे।।

रविदास महोदयानुसारं मनः पवित्रमस्ति तर्हि "पात्रे मध्ये एव गंगा वर्तते।

रघुवंश महाकाव्ये रघुकौत्स संवादे दक्षिणा विषये रोचक प्रसंगो वर्तते। शास्त्रेषु दानवीरकर्णस्य नृपबलिः इत्यादीनां दानवीरतायाः उल्लेखो वर्तते। गुरुं प्रति शिष्यस्य दक्षिणायां एकलव्यस्य उदाहरणं अस्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आधुनिकसंस्कृतशिक्षायां राजस्थानप्रान्तस्य संस्कृतविदुषामवदानम्

राधेश्याम खाती
शोधछात्रः
जगद्गुरूरामानन्दाचार्य राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्

संस्कृतजगति राजस्थानप्रान्तस्य महत्वपूर्णं स्थानं वर्तते। अस्य प्रान्तस्य पावनधरायां अस्याः साहित्यस्य गौरवं अतीव समृद्धं अस्ति। अत्र समये दृसमये अनेके विद्वासः जनिं लब्ध्वा अस्य सम्माने वृद्धिम् अकुर्वन्। सम्पूर्णभारते यदा अविच्छिन्नरुपेण प्रवाहमाना गंगाधारावत् संस्कृतधारा आसीत् तादृशीः स्थितिः संस्कृतस्य राजस्थानेऽपि आसीत्। अत्रापि संस्कारसमन्वित– जीवनशैल्यां प्रवाहमाना आसीत्।

राजस्थानस्य गौरवभूतकुमुदकोकिलसंस्कृतमर्मज्ञ उपमागौरवपदलालित्यं विशारदा "शिशुपालवधम्" महाकाव्यस्य प्रणेता महाकविमाघः जन्मः लब्ध्वा अत्र संस्कृत परम्परायाः श्रीगणेशः कृतवान्। साम्प्रतं शिक्षाक्षेत्रे राजस्थानप्रदेशः उन्नतिपथमारुढो वर्तते। राजस्थाननीयाः जनाः संस्कृतं प्रति विशेषमनुरागं प्रदर्शयन्ति।

राजस्थानस्य विभिन्नाञ्चलेषु विद्वद्भिः संस्कृतभाषायाः प्राच्यविद्यापरम्परां अक्षुण्णां विधातुं यदनुष्ठानं कृतं तद् देशस्येतिहासे सम्मुल्लेखनीयम् वर्तते। अधुना अपि अस्याः भाषायाः गौरववर्धनार्थं राजस्थानप्रान्ते संस्कृतविदुषानां अभ्यासः सततं प्रवर्तमानम्। अस्यां भाषायां विभिन्नविश्वविद्यालयेषु नवीनतमं शोधकार्यं प्रचलितम्। संस्कृतमाध्यमेन लेखनस्य तथा नूतनसाहित्यस्य रचनार्थेभ्यः राजस्थानस्य अग्रणी भूमिका वर्तते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वशक्तीश्वरी सीता

महेशशर्मा (शास्त्री कोसलेन्द्रदास)
सहायकाचार्यो दर्शनविभाग
जगद्गुरुरामानन्दाचार्य–राजस्थान–संस्कृत–विश्वविद्यालय
जयपुरम् – 302026

सकलकुशलदात्रीं भक्तिमुक्तिप्रदात्रीं
त्रिभुवनजनयित्रीं दुष्टधीनाशयित्रीम्।
जनकधरणिपुत्रीं दर्पिदर्पप्रहर्त्रीं
हरिहरविधिकर्त्रीं नौमि सद्भक्तभर्त्रीम्॥

वेदेतिहास–पुराणादिषु सर्वत्र भगवती जगज्जननी जनकनन्दिनी श्रीमद्राघवेणानन्या सीता एव ब्रह्मरूपेण गीयते। तस्या एव भगवत्यारू जानक्याश्चरितं सर्वेषु निगमागमशास्त्रेषु प्रविस्तृतम्। तच्चरितस्य एकैकमप्यक्षरं सर्वपातकनाशकमिति प्राचीनानामाचार्याणां निर्णयरू। सीता शरणागतप्रतिपालनव्रतिनो भगवतः श्रीरामचन्द्रस्य प्राणप्रिया–आद्याशक्तिश्च। भगवत्यारू श्रीरामवल्लभायारू भ्रूकुटिविलासमात्रेण जगतः जन्म–स्थेम–भङ्गादिकार्याणि जायन्ते। श्रूयत एव–

उत्पत्ति–स्थिति–संहारकारिणीं सर्वदेहिनाम्।
सा सीता भगवती ज्ञेया मूलप्रकृतिसंज्ञिता॥1

मूलप्रकृतिसंज्ञका भगवती सीता–

समेषां देहधारिणामुत्पत्ति–स्थिति–संहारकर्त्री मूलप्रकृतिसंज्ञका भगवती सीता एव निमेषोन्मेषसृष्टि–स्थिति–संहारतिरोधानानुग्रहादिसर्वशक्तिसामर्थ्यात्साक्षाच्छक्तिरिति गीयते।2 यस्याश्चक्षुषोः निमेषोन्मेषमात्रेण चिद्–अचित्तत्त्वानां सृष्टि–स्थिति–संहाराश्च सम्भवन्ति, तत्तत्त्वं श्रीसीता एव। सा सर्वशक्तिसामर्थ्यात् साक्षाच्छक्तिरिति श्रीमद्रामायणादिषु वर्णिता। तिरोधान–अनुग्रहगुणावपि तस्यामेव सम्भवतरू। भूर्भूवरू स्वरू सप्तद्वीपा वसुमती त्रयो लोका अन्तरिक्षं सर्वे त्वयि निवसन्ति। आमोदरू प्रमोदः विमोदरू सम्मोदरू सर्वांस्त्वां सन्धत्से। आञ्जनेयाय ब्रह्मविद्याप्रदात्रि धात्रि त्वां सर्वे वयं प्रणमामहे प्रणमामहे।3 हे विदेहराजबालिके! पृथिवी–पाताल–त्रिविष्टपानीति त्रीणि भुवनानि, सप्तद्वीपवती काश्यपी त्रयो लोका आकाशश्च त्वयि (सीतायाम्) एव सुप्रतिष्ठिता। गुरूणां गुरुं वायुपुत्रमाञ्जनेयं त्वमेव ब्रह्मविद्यामध्यापयरू। अत एव लङ्कादहनवानरोऽयं 'सीताशिष्य' कथ्यते। ऋग्वेदेऽपि–

अर्वाची सुभगे भव सीते! वन्दामहे त्वा।
यथा नरू सुभगासिस यथा नरू सुफलाससि॥4

हे असुरनाशकारिणि सीते! वयं तव चरणेषु प्रणमामरू। पदप्रपन्नपालिके देवि! देहि कल्याणं सौभाग्यं परमं सुखञ्च। आथर्वणेऽपि–जनकस्य राज्ञरू सद्मनि सीतोत्पन्ना सा सर्वपरानन्दमूर्तिर्गायन्ति मुनयोऽपि देवाश्च, कार्यकारणाभ्यामेव परा तथैव कार्यकारणार्थे शक्तिर्यस्यारू, विधात्रीश्रीगौरीणां सैव कर्त्री रामानन्दस्वरूपिणी सैव जनकस्य योगफलमिव भाति।5 महात्मनरू जनकस्य गृहे भूम्यामुत्पन्ना कन्या भूमिजा सर्वपरा आनन्दमूर्तिश्च। मुनयरू देवाश्च तस्या एव जानक्यारू गीतकानि गायन्ति। कार्य–कारणाभ्यां परा सा कार्य–कारणशक्तिसम्पन्नास्ति। सा ब्रह्म–विष्णु–रुद्रेन्द्रसेविता सीता ब्रह्माणी–सिन्धुजा–शैलजा–श इत्यासामपि उत्पादिका। इत्थं श्रुतयरू तामेव भगवतीं सीतां परत्वेन वर्णयन्ति।

श्रुतिमाता सीता–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाल्मीकिसंहितायां सीता श्रुतिमातृत्वेन वर्णिता। एकदा श्रुतयरू स्वमातापितृविषये जिज्ञासां चक्रुर्यत् अस्माकं पितरौ कौ? ब्रह्माणं निकषा तारू स्वप्रश्नमुपस्थाप्य निवेदयामासुः–

कास्माकं जननी देव करू पितेति निबोधय।

तासां श्रुतीनां जिज्ञासाशमनार्थं चतुर्मुखो ब्रह्मोवाच–

तामेव जानकीं वित्त जननीमात्मनरू पराम्।
श्रीरामं पितरं वित्त सत्यमेतद्वचो मम॥
नित्यां निरञ्जनां शुद्धां रामाभिन्नां महेश्वरीम्।
मातरं मैथिलीं वन्दे गुणग्रामां रमारमाम्॥
आद्यां शक्तिं महादेवीं श्रीसीतां जनकात्मजाम्।
सीतायाश्च परादेव्या लीलामात्रमिदं जगत्॥

सदाशिवसंहितायामपि श्रीसाकेतधाम्नो वर्णनं प्राप्यते–

तन्मध्ये जानकी देवी सर्वशक्तिनमस्कृता।

श्रीबृहद्विष्णुपुराणेऽपि श्रीमन्मैथिलीमाहात्म्ये–

जगद्धात्रीं महामायां महारूपां सनातनीम्।
दृष्ट्वा प्रमुदितारू सर्वे देवताप्सरकिन्नरारू॥
जानक्यंशादिसम्भूताऽनेकब्रह्माण्डकारिणी।
सा मूलप्रकृतिर्ज्ञेया महामायास्वरूपिणी॥

श्रीमहाशम्भुसंहितायां महर्षिरगस्त्यरू स्वप्रियशिष्यं सुतीक्ष्णमेवं प्रबोधयामास–

सीताकलांशाद्बह्व्यश्च शक्तयरू सम्भवन्ति हि।

श्रीसम्प्रदायाचार्या सीता–

सीतानाथप्रवर्तितवैदिकश्रीसम्प्रदायस्य मध्यमाचार्यरू 'सर्वे प्रपत्तेरधिकारिणो मतारू' इति उद्घोषयन् रामभक्त्या अनुपमप्रचारको वैष्णवाचार्यरू श्रीमद्रामानन्दाचार्यो 'वैष्णवमताब्जभास्कराख्ये' सिद्धान्तग्रन्थे अपरिमितशक्तिसम्पन्नां भगवतीं सीतां स्तौति–

ऐश्वर्यं यदपाङ्गसंश्रयमिदं भोग्यं दिगीशैर्जग–

च्चित्रं चाखिलमद्भुतं शुभगुणा वात्सल्यसीमा च या।
विद्युत्पुञ्जसमानकान्तिरमितक्षान्तिरू सुपद्मेक्षणा
दत्तां नोऽखिलसम्पदो जनकजा रामप्रिया सानिशम्॥6

